M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 863

Title: Sigrabodha
(Jyotish)

863

शिघ्रबोध (Book on ज्योतिष्)

Shighrabodha (Book on astrology)	Title
Kāshinātha	Author
	Editor
	Year, Vols.
	Publisher
863	Remarks

शिघ्रबोध॥ ॥श्रीसरस्वत्यैनमः॥ ॥श्रीगणेशायनमः॥ ॥श्रीगुरुभ्योनमः॥ ॥अथशिघ्र
१ बोधलख्यंते॥ ॥नासत्यंतंजगन्नासा।नत्वानास्कतमव्ययं।क्रियतेकाशिनाथे
नशिघ्रबोधायसंग्रहः॥१॥रोहणपूत्तररेवत्यो॥मूलस्वातिमृगोमघा॥अनु
राधाचहस्तेच।विवाहेमंगलप्रदाः॥२॥इतिविवाहनक्षत्राणि॥ ॥माघेधनवती
कन्या॥फाल्गुनेसुभगाभवेत्॥वैशाषेचतथाज्येष्टे।पत्युरस्मंतवल्लभा॥३॥अषाडे
कुलवृद्धिस्यात्तुतदन्येमासाश्चवर्जिता॥मार्गशीर्षमपिछंति।विवाहेकेपिको राम
विदा॥४॥पाणिग्रहणान्नारीचापूत्रवतीचकार्तिके॥कथयंतिमार्गशीर्षे।नि १
जभर्तृपरायणा॥५॥मृगालिमीथुनेमेषे।वृषकुंभस्थितेरवि।परिणीतायदाकन्या

सुखसौभाग्यदायिनी॥६॥इतिविवाहमासा॥ ॥अमावास्याचरिक्ताच।वारवेला
चजन्मभं।गडांतंकूडवारश्च।वर्जनियाप्रयत्नतः॥७॥नंदाभद्राजयारिक्ता॥पूर्णा
श्चतिथयःक्रमात्॥वारत्रयसमावर्त्तितिथयःप्रतिपन्मुखात्॥८॥तूर्येर्कस
सप्तमश्चंद्रेद्वितीयाभूमिनंदने॥चन्द्रपूत्रेपंचमश्चदेवाचार्येतथाष्टमे।एदैत्यपूज्ये
त्रतीयश्चशनौषष्टश्चनंदितः॥प्रहरार्द्धशुभेकार्ये।वारवेलेतिकथ्यते।१०॥भद्राचक
र्कयोगंच।निष्यंतेयमघंटकं॥दग्धातिथिचमांतच।कूलिकंचविवर्जयेत्॥११॥
दशम्यांचत्रतीयायां।कृष्णपक्षेपरेदले॥सप्तम्यांचचतुर्दश्यां॥विष्टिपूर्वदलेस्मृता
॥१२॥एकादश्यांचतुर्थ्यांच।शुक्लपक्षेपरेदले॥अष्टम्यांपूर्णिमायांचभद्रापूर्वद

लेस्मृता॥१३॥मृगांगनाधन्वितुलाधरेषु।पाताललोकेनिवसंतिस्कुविष्टे॥मेषा
लिवृंदेष्टषभे दिविसंस्थिता।कीटांतसिंहेघटगेचमर्त्ये॥१४॥सन्मुखस्थामृत्युलोक
स्था।पातालस्थाश्वधोमुखी।ऊर्ध्वास्यास्वर्गगाभद्रासन्मुखामर्त्यकुहानिदा॥१५॥
आदौअष्टघटीस्वर्गे।ततोषोडशभूतले॥ततद्वर्धंषष्टपाताले।भद्रात्रिंशघटीक्रमात्
॥१६॥स्वर्गेचलभ्यतेसौख्यं।पातालेचधनागमं॥मृत्युलोकेनवेत्तचिंता।एवंभद्रा
फलादिता॥१७॥इतिभद्रा॥ ॥मीनेचापेद्वितीयायां।चतुर्थीवृषकुंभयोमेषक
र्कटयोषष्टी।कन्यायांमिथुनेष्टमी॥१८॥दशमीवृश्चिकेसिंहे।द्वादशीमकरेतुले॥
एताश्चस्तिथयोदग्धाःशुभेकर्मणिदिना॥१९॥इतिदग्धातिथिः॥ ॥मासांतेभि

यतेकन्या।तिथ्यंतेसादपूत्रिणी॥नक्षत्रांतेचवैधव्यं।भद्रामृत्युर्द्वयोर्भवेत्॥२०॥सूर्ये
सप्तमीचंद्रे।षष्ठीभौमेचपंचमी।बुधेचतुर्थीदेवज्येः तृतियाभृगुनंदने॥२१॥द्वितिया
वर्जनियाश्च॥प्रतिपच्चशनिश्चरे॥कुलिकाख्यादियोगोयं।विवाहादौनसम्मतो॥२२॥
इतिकुलिकयोगः॥ ॥अवर्गेगरुडोज्ञेया।विडालस्याकवर्गकः॥चवर्गेसिंहनामास्या
त्।टवर्गकुक्कुरस्मृतः॥२३॥सर्पस्यस्यात्तवर्गोपि।पवर्गेमुखकोमनः॥यवर्गेमृगनामा
स्यात्।तथामेषश्शवर्गकः॥२४॥स्ववर्गेपरमाप्रिति।मित्रेप्रितिरल्पा।शत्रुवर्गेमृतिर्भवेत
॥२५॥वैरंमुखकमार्जारीवैरंसर्पगरुडयोः॥वैरंमृगसिंहस्य।वैरंश्वानमेढयो॥२६॥
योयत्रपंचमेस्थाने।वैरंतत्रनियोजयेत्॥२६॥इतिवर्गप्रिति॥ ॥अश्विनिमृगरेव
त्या।हस्तपुष्यपुनर्वसु॥अनुराधाश्रुतिस्वाक।पितोदेवतागणः॥२८॥निरपु

र्वा उत्तराश्च। तिस्रोप्पार्द्राश्च रोहिणी॥ भरणी च मनुष्याख्यो। गणो सौ कथितो बुधैः॥२९॥
कृत्तिका च मघाश्लेषा। विशाखा शततारकाः॥ चित्रा ज्येष्ठा धनिष्ठा च। मूलं रक्षोगणः स्मृता
॥३०॥ स्वगुणे चोत्तमा प्रीती। मध्यमा देवमर्त्ययो॥ मर्त्यराक्षसयोर्मृत्यु। कलहो देवरा
क्षसां॥३१॥ इति गणप्रीतिः॥ ॥षष्टेस्त्री पुंसयोर्वैरं। मृत्युस्यादष्टमे ध्रुवं। द्विद्वादशे शुदारि
द्र्यं॥ नवमे पंचमे कलिः॥३२॥ इति राशिमेलनमैत्री। मिनालि कर्कटा विप्रा। क्षत्री मेषो ह
रिर्धनुः॥ तुलाद्रा युग्मे तुलाकुंभौ वैश्या कन्या वृषो मृगः॥३३॥ नोत्तमा शुद्रकन्या ब्राह्मणी
च विशेषतः॥ म्रियते हि न वर्णस्तु। ब्राह्मणो सदृशो यदि॥३४॥ इति वर्णमैत्री॥ ॥पौ॰ राम
ष्णादिकं षट्कमुशंति पूर्वं। मार्गादिकं षट्कमुशंति पूर्वं। मार्गादिकं फाल्गुन मध्यभागं। पौ ३
रंदरश्यां न वकुं न वकं। परं च नागं गणना विदध्यात्॥३५॥ पूर्वनागो पतिश्रेष्ठो। मध्य

नागं च कन्यां॥ परनागे च नक्षत्रे। द्वयोः प्रीतिर्माहियसि॥३६॥ इति नक्षत्रयुंजिप्रिति
॥ ॥ सिंहं विना वनं सर्वे। द्विपदा नो चतुष्पदाः॥ नक्राज जलचरास्तेषां। नयस्थाने सरिस्र
पाः॥३७॥ मकरस्य पूर्वनागो। मेषः सिंहो धनु: वृष॥ चतुष्पदा कीटसंज्ञः कर्कसर्पस
हवृश्चिकः॥३८॥ इति वश्यमैत्रीः॥ ॥अश्विनि वरुणा श्वाश्वो। रेवति भरणी गजः॥ पूष
श्च कृत्तिका छागो। नागश्च रोहिणी मृगः॥३९॥ आर्द्रा मूले मपि श्वान। मुख व फाल्गुनी मघा
। मांजारो दितिश्लेषा। उफा उभे चगो क्रमात्॥४०॥ महीषो स्वाति हस्ते चा। मृगो ज्येष्ठानु
राधिकां॥ व्याघ्र चित्रा विशाखा च। शकत्यो पूषा च मर्कटौ॥४१॥ वसुनाद्रपदा सिंहो। यो
निस्तु कथिता बुधैः॥ अभिजिच्चोत्तराषाढे। नकुलौ च तथा स्मृतौ। योनयः कथित
माना। वैरं मित्री विचार्यतां॥४२॥ इति योनिमैत्रीः॥ ॥मरणे पित माताश्वसुरस्याहीन

शिघ्रबो. वपंचमौ॥ वरस्य पंचमे कन्या। कन्यायान वमेवरः॥४३॥ एतत्त्रिकोणकंयासं। पुत्रपौ
४ त्रसुखावहं॥ षड्डाष्टकेनवेन्मृत्कर्यतं शुद्धि विचारयेत॥४४॥ इतिराशिमिलनं॥ ॥वैर
स्यना स्करवलं॥ कन्यायाश्च गुरोर्बलं॥ द्वयोश्चंद्रबलं याह्यं। विवाहेनान्यथान्नवेत्॥४५
अष्टमेचचतुर्थेच। द्वादशेच दिवाकरे। विवाहितो नरो मृत्यं। प्राप्नोत्य त्र न संशयः॥४६॥
जन्मन्यथाद्वितियेवा। पंचमे सप्तमेपिवा॥ नवमे च दिवानाथे। पूजयात्याणिपीडनं॥४७
एकादशे तृतिये च। षष्टे वा दशमेपिवा॥ वरस्य शुभदो नित्यं। विवाहे दिननायकः॥४८॥
इतिरविबलं॥ ॥अष्टमे द्वादशे वापि चतुर्थे वाष्टदस्पतौ॥ पूजातत्र न कर्त्तव्या॥ विवा राम
हप्राणनाशकः॥४९॥ षष्टे जन्मनि देवेज्य तृतिये दशमेपिवा॥ गुरिपूजा पूजितास्या। क ४
न्यायां शुभकारकः॥५०॥ एकादशे द्वि। द्वितिये च पंचमे सप्तमेपिवा॥ नवमे च सुरा

चार्यः कन्याया कथितः शुभः॥५१॥ इतिगुरुवलं॥ ॥अथ चंद्रबलं देया। मनस्तोषं द्वि
तियके॥ तृतियेधनसंपत्ति। चतुर्थे कलहागमं॥५२॥ पंचामे ज्ञानवृद्धिश्च। षष्टे सुपत्ति
मुत्तमं॥ सप्तमे राजसन्मानं। मरणं चाष्टमे तथा॥५३॥ नवमे धर्मलाभंचा दशमे मानसे
प्सितं॥ एकादशे सर्वलाभं॥ द्वादशे हानिमेवचा॥५४॥ इतिचंद्रबलं॥ ॥अष्टवर्षाभवे
द्गौरि॥ नववर्षा च रोहिणी॥ दशवर्षाभवे कन्या तदुर्ध्वं स्याद्रजस्वला॥५५॥ द्वादशैका
दशे वर्षे। यस्या शुद्धिन जायते॥ पूजा त्रिःशकुनैपापि तस्यालग्न प्रदापयेत॥५६॥ पंचो
ध्यांस्थापयेद्रेषा॥ पंचतिर्यङ्मुखास्तथा॥ द्वयोश्चकोणयोर्द्वे द्वे। चक्रंपंचशलाककं
॥५७॥ ईशान्यकर्तिकं देया। क्रमादन्यानि भानिच॥ ग्रहास्तेषु प्रदातव्या। वेधं च तत्र प्र
दिष्टिता॥५८॥ जन्मपातौ यूतिवेधो। यामित्रं बुध पंचकं॥ एकार्गलो चोपग्रहो॥ क्रांति

शीघ्रबोध· सामंतथापरं॥५९॥ दग्धातिथिश्च विज्ञेया। दग्धा दोषमहाबला॥ एतान्दोषान्परित्य
५ ज्य॥ लग्नं संशोधयेद्बुधः॥६०॥ नक्षत्रैकादशे भानुस्तृतीयलग्ने याऽसुतः॥ षष्ठे जीवेष्टमे
मंदो॥ इति दग्धिगणतः सदा॥६१॥ वामेन सप्तमे चांद्रि। नवमे सिंहिकासुतः॥ हंतिजपंचमे
शुत्राक्को द्विविंशो पूर्णचंद्रमा॥६२॥ रवेर्लग्ना हरेद्वित्तं। कुजस्य। कुरुते मृतिं। बृहस्पतेर्वित्त
नाशं॥ शनेः अर्या कुलक्षयं॥६३॥ धस्यञ्जरुत्तेत्रा संलिन्नाराहोविना शोयेत्॥ शुक्रस्य
दुःखदायित्वं। त्रांसदा चक्रला निधेद्ध॥६४॥ इतिजता॥ ॥सूर्ययुक्ता वन[illegible] हत्वा देशु
पातेऽधीयते। मघाश्लेषाच ज्येष्ठाच॥ मानुराधाच रेवति॥६५॥ श्रवणे पि च पद्धोयं॥ राम·
पातदृष्टो निगद्यते॥ अश्विनि मवर्द्धिंकत्वा॥ गणये लग्नमावधि॥६६॥ पावकः पावमानश्च ५
विकारः कलहोपर॥ मृत्यकक्षयश्च विज्ञेयां॥ पातरवक्ककस्य लक्षणं॥६७॥ पातेन पति

तो ब्रह्मा। पातेन पतितोशंभूस्तस्मात्पातं विवर्जयेत्॥६८॥ इति पात॥ ॥एकरेखा
स्थिता चैषा। दिननाथाद्यो ग्रहा॥ विवाहितत्रमासंतु न जिवंति कदाचनः॥६९॥ अश्विभिश्च
निपूर्वफाल्गुन्यो॥ तरणि चानुराधयो॥ अभिजिश्चापि रोहिण्यो। कृत्तिकाचविशाखयो॥७०
मृगश्चोत्तरषाढेन। पूर्वाषाढ[illegible]स्तथार्द्रया॥ पुनर्वसुचमूलेन। तथापुष्पश्च ज्येष्ठया।७१॥ धनि
ष्ठायां तथाश्लेषा॥ मघापि श्रवणेनच॥ रेवतुत्तरफाल्गुन्या। हस्तेनोत्तरभाद्रपात्॥७२॥ स्वात्या
शतभिषाविद्धा। चित्राया पूर्वभाद्रपात्। विवाहेतानिवर्ज्यानि। विवाहेन्यानिकोविदैः॥७३
रविवेधेचवैधव्यं कुजवेधेकुलक्षयं॥ धवेधे नवेर्द्ध्या॥ प्रव्रज्यागुरुवेधतः॥७४॥ अपू
नातुकवेधेच। सौरेचंदे च दुःखिता॥ परपुरुषरता राहो। केतो स्वच्छंदचारिणी॥७५॥ इतिवे
धः॥ ॥यत्र गृहे न वेधश्च दोषो ग्रहो न तत्र यदा न चेत्॥ यूतिदोषस्तदा ते यो। विना शुक्रं गुणामु

नं॥७६॥रविणासंयुतोहानिंभौमेननिधनंशशी करोतिमूलनाशंच॥राहुकेतुशनिश्चरैः
७७॥इतियुतिः॥ ॥चतुर्दशंचनक्षत्रं।यामित्रंलग्नचंद्रकं॥शुभयुक्तंतद्दृष्टंतु।पापयुक्तंच
वर्जयेत्॥७८॥चांद्रचांद्रिशुक्रजीवा।यामित्रेशुभकारका॥रविमंनिशाजानुमंदारा॥यामित्रे
नशुभप्रदाः॥७९॥चंद्राद्वालग्नतोवापिग्रहोवर्ज्यश्चतुर्थके॥तत्रस्थितोग्रहाहन्तुनं॥व्याधि
वैधव्यकारका॥८०॥इतियामित्रः॥ ॥धार्यातिथि१५मास१२दशा१०८वेदा४संक्रांति
तोयातदिनैश्चयोज्याः॥ग्रहैर्विभक्तोयदिपंचकंस्या॥रोगास्तदाग्निर्नृपचौरमृत्यु॥८१
इतिबाणपंचकं॥ ॥सूर्यभात्पंचमेविद्युन्नक्षत्रेमूलमष्टमे॥चतुर्दशेचनिपात॥केतु
रष्टादशोतथा॥८२॥उल्काविंशेभवेदुल्कानिर्घातस्तुद्विविंशके॥त्रयोविंशतिकेपंक
॥चतुर्विंशेश्चवज्रकः॥८३॥पूजनाशकरीविद्युत्।शूलोप्याववविनाशकः॥शनोपातोवंशघा

ति।केतुरदेरनाशकः॥८४॥द्रव्यनाशकरीचोल्का।निर्घातोबंधुनाशकः॥पंकंपंकयते
नित्यं॥वज्रश्चीव्यभिचारिणी॥८५॥इत्युपग्रहं॥योगांकेविषमेचैकेन्हेयोष्टाविंशतिःस
मे॥संध्दीकृत्वाद्यनिपूर्वामकर्णमुर्ध्निदीयतां॥८६॥विकुंभेचाश्विनीदेया॥प्रीतौस्वाति
नीगद्यते।सौभाग्येचविशाखास्यादायुष्मान्भरणीयुतः॥८७॥शोभानेकृत्तिकाज्ञेया॥अ
नुराधातिगंडके॥रोहणिचसुकर्मास्ये।ध्रुवेज्येष्टाप्रकिर्तिता॥गंडेमूलंमृगोःशूले।वृद्धो
चार्द्रानिगद्यते॥पूर्वाषाढाध्रुवःप्रोक्ता।व्याघातेचपुनःर्वसु॥८८॥हर्षणेवोत्तराषाढे
वज्रेपुष्यप्रकिर्त्तिताः॥अभिजिश्चतथासिद्धौ॥चाश्लेषांव्यतिपातकौ॥८९॥वरीयसीश्र
तिया॥परिघेचमघातुया।शिवेधनिष्टाहस्ता।सिद्धेपूर्वाफाल्गुनी॥९०॥साध्येशत
भिषादेया।शुभेचोत्तरफाल्गुनी॥पूर्वाभाद्रपदाशुक्ले।हस्तेब्रह्माणिकिर्तिता॥९१॥उत्तरा।

न्माद्‌ पद्दाचेंद्रे। चित्रादेयाच वैधृतौ॥ सूर्यचंद्रमसो योगे भवेद्‌ कार्गलं तथा।९४। त्रयोदश
तिरो रेखा। एकोर्ध्वमुर्ध्वि विसृता॥ योगांक ग्रामनक्षत्रे। ज्ञेया मेकार्गलं बुधैः॥९५॥ एते
कार्गलं॥ ॥उर्द्ध्वास्तिर्यस्तिरःस्तिरा। मध्ये मीनं लिखेद्बुधैः॥ सूर्यचंद्रमसौ दृष्टौ। क्रांतिसाम्यं
निगद्यते॥९५॥ मीनकन्यकयायुक्तो। मेषसिंहेन संगतः॥ मकरेण वृषक्रांति। श्चापो पि मि-
थुनेनच॥९६॥ कर्केण वृश्चिको विद्धो। वेदृश्चतुजकुम्भयोः॥ स्त्रीभिर्मिथ्ये गोरवम्हतौ स्व-
परंस्त्रोपि जिवति॥९७॥ क्रांतिसाम्ये कृतो द्वाहो। वर्जितं निकदाचन॥९८॥ इति
क्रांतिसाम्यः॥ ॥मर्मवेध कंटकश्चा शल्यं छिद्रं चतुर्थकं॥ एतद्दोषं चतुष्कं चापरित्याज्यं
प्रयत्नतः॥९९॥ लग्ने पापे मर्मवेधः कंटके नवपंचके॥ चतुर्थे दशमे शल्यं। छिद्रं भवति
सप्तमे॥१००॥ मरणं मर्मविधे स्यात्‌। कंटके च कुलक्षयं॥ शल्ये च न्नपतिर्मिर्ति। पुत्रनाश

श्च छिद्रके॥१०१॥ मासांते दिनमेकं तु। तिथ्यंते घटीकाद्वयं॥ घटीकात्री नयंस्नांते॥ विवाहे प-
रिवर्जयेत्‌॥२॥ जन्ममासे जन्मभे च न च जन्मदिने बुधैः॥ जेष्ठे मासे च जेष्ठस्य। विवाहं कारयेत्क-
चित्‌॥३॥ न कन्यावरयोर्ज्येष्ठे। ज्येष्ठयोः पाणिपीडनं। द्वयोरेकतरे ज्येष्ठे। न ज्येष्ठा दोषमावहे॥४॥
सिंहे गुरो गते कार्यो। न विवाहः कदाचन॥ मेषस्थे च दिवानाथे। सिंहे गुरुश्चातै पिस्तु न प्दर-
॥५॥ रवौ सार्द्धत्रयो भागाः। पंचचंद्रे गुरौ त्रयः॥ द्वौ शुक्रौ द्वौ च चंद्रपूत्रे। भाग विश्वा पदा सप्तमी॥६॥
प्रत्येकं सार्द्धभागश्च। मंदमंगलराहुषु॥ व्याहाव जयुता विश्वा। प्रयच्छंति नदुर्बला॥७॥ इति वि
श्वाः॥ ॥धने शुभः सदा चंद्रः पापा षष्टे च शोभना॥ त्रतिये कादशे सर्वे। सौम्याः पापाः शुभ
प्रदाः॥९॥ शनिः सूर्यश्च लग्ने स्तो। चंद्रः शो लग्नोष्टमे रिपो॥ भूजो जग्ने ष्टमे चास्तो। शुक्रो द्वनेष्ट
मे रिपो॥१०॥ गुरुमृत्यु सिंहिकेया। लग्ने तृर्ये च सप्तमे॥ बुधे ष्टमे व्यया मित्रे। विवाह प्राणना

विवाहबोध· नाकः॥११॥ क्रूरयोरंतरे लग्नं चंद्रं च परिवर्जयेत्॥ वरहंति द्युनं लग्नात् तरभ्मिश्च कन्यकां॥१२॥
८ तुलाच मिथुनं कन्या॥ पूर्वार्धे धनुषो नृष॥ एते लग्नाः शुभा नित्यं॥ मध्यमाश्चापरे ताः॥१३॥
लता च मालवे देशे॥ पातश्च कुरुजांगले॥ एकार्गलश्च काश्मिरे॥ वेधः सर्वत्र वर्जयेत्॥१४॥
मेषानवांशमेषाद्या॥ वृषे च मकरादिका॥ मिथुने च तुलाद्यास्फ॥ कर्के च मकरादिका॥१५॥
मेषाद्यो च धनुसिंहो॥ गो कन्या मकरादिके॥ तुलाद्यो युग्म कुंभौ च॥ कर्काद्यो मीनवृश्चि
कौ॥१६॥ गोतुलायुग्मकन्यानां॥ नवांशाः शुभदाः स्मृताः॥ धनुषः प्रथमो भागो॥ विवाहे न्यच मध्यमा॥१७
स्वंशे च पतिरंशे च॥ तन्मित्रं वा शुभोपि वा॥ पवपेत्र दाशुभो ज्ञेयो॥ सर्वे दोषाश्च निष्फलाः॥१८॥ क राम·
ष्णाष्टमीसमारभ्य॥ फाल्गुनस्य दिनाष्टकं॥ पूर्णिमावधिकं त्याज्यं॥ होलाष्टकमिदं स्मृतं॥१९॥ ८
शतद्रुश्च विपाशायां॥ ऐरावत्यां त्रिपुष्करे॥ होलाष्टकं विवाहे त्याज्यमन्यत्र शोभनं॥२०॥

इति होलाष्टकः॥ ॥दिवसांध्या वृष मेष सिंहा॥ रात्रौ च कन्या मिथुनं कुलीरः॥ मृगस्त्र
जालिर्बधिर परान्हे॥ संध्यासु कुब्ज घट धन्वि मीना॥२१॥ दिवांधे वरहंता च॥ रात्र्यंधो धनना
शकः॥ दुखदो बधीरो लग्न॥ कुब्जो वंश विनाशनः॥२२॥ यत्र एकादशो चांद्रो॥ द्वितियस्तृतिय
के॥ गोधूलिकस विज्ञेय॥ शेषा धूलिमुखास्मृताः॥२३॥ तत्कालीकं कांतिसाम्यं च॥ लग्ने षष्टाष्टमे रा
शि॥ विविध वैधपरित्यज्य॥ एवं दोषेण दुखिताः॥२४॥ यदा नस्तंगतो भानु॥ गोधूल्या पूरितं नभः॥ सर्व
मंगलकार्येषु॥ गोधूलिः स्मस्यते तदा॥२५॥ अष्टमे जीवनो मेवा॥ बुधश्च भार्गवोष्टमो लग्ने षष्टे ष्टमे य
चंद्रो॥ गोधूलि नाशकस्तदा॥२६॥ इति धूलिः॥ ॥लग्नाद्वैकादशो सर्वे लग्नपुष्टिकरा ग्रहाः॥ तृति
येचाष्टमे सूर्ये॥ पूर्वेषा एकादशो तथा॥२७॥ चंद्रो धने तृतीये च॥ त्रजषष्ट तृतीयके॥ बुधो ज्ञोनवषष्ट द्विति
चतुर्पंच दशस्थितो॥२८॥ शुक्रो द्वित्रिचतुःपंच द्यूनास्थि धर्म कर्म न तु स्थिता॥ राहु हशाष्ट षष्टपंचः॥ त्रिनवद

दृष्टो शुभः ॥२९॥ इति ग्रहरेखा ॥ ॥छायापादैरसंयुक्तं एकविंशतिं भजेत् ॥ लब्धांके घटिका
ज्ञेया शेषां खांके च पलास्मृताः ॥३०॥ इति दिनलग्नज्ञानं ॥ ॥पूर्वाषाढानुराधा च ज्येष्ठाश्लेषा च रे
वती ॥ विशाखा च यदा मुक्तिस्तदा स्यात्पलोदयः ॥३१॥ मस्तके मृगशीर्षे च ॥ मूले च नवमोदयः ॥ भनक्षत्रं
यदा मूर्ध्नि तदा स्यात्सप्तमोदयः ॥३२॥ सूर्यभान्मौलिभं यावत् सप्तहीनं च शेषकं ॥ द्विगुणं चंद्रहीनं च ॥ म
तं त्रिस्फुटं भवेत् ॥३३॥ इति रात्रिलग्नज्ञानं ॥ ॥किं कुर्वंति ग्रहाः सर्वे यदि केंद्रे बृहस्पतिः ॥ मत्तमा
तंगयूथानां शतं हंति च केसरी ॥३४॥ शुक्रः कोटिसहस्राणि बुधो दशशतानि च ॥ लग्ने मेकं च
दोषाणां गुरुः केंद्रे व्यपोहति ॥३५॥ सर्पाकारं लिखेच्चक्रं ॥ विवाहे च त्रिनाडिकं ॥ अश्विनी प्रमुखं
भं च दत्वा साम्यं विचारयेत् ॥३६॥ एकनाडिस्थनक्षत्रे दंपत्योर्मरणं ध्रुवं ॥ सेवायां च भवेद्धानि
विवाहे च शुभं भवेत् ॥३७॥ इति फणीचक्रं ॥ ॥परिघार्द्धं व्यतिपातौ वैधृतिं सकलं त्यजेत्

ज्येत ॥ विष्कुंभे घटिका पंच ॥ शूले सप्त प्रकीर्तिताः ॥३८॥ षट् गंडे चातिगंडे च ॥ नव व्याघात
वज्रयो ॥३९॥ इति वज्रयोगवर्जनीयः ॥ पटाकारं लिखेच्चक्रं मष्टकोणसमन्वितं यस्मिन्रू
क्षे भवेत्सूर्य ॥ तदाद्यमध्यगे त्रयं ॥४०॥ त्रयं त्रयं च सर्वत्र ॥ ततः पूर्वादितो लिखेत् ॥ नक्षत्रं त्रितयं मध्ये
पक्षद्वय विशाखकं ॥४१॥ पूर्वस्थाने भवेल्लक्ष्मी ॥ धनधान्यसमागमं ॥ अग्निकोणे भवेन्मृत्युः ॥ नारी
स्वजनविनाशनी ॥४२॥ दक्षिणे दुर्भगा नारी ॥ दरिद्री मृत्युमाप्नुयात् ॥ नैरृते पुत्रलाभश्च सुखसौभाग्य
मेव च ॥४३॥ पश्चिमे विधवा कन्या ॥ वायव्ये व्यभिचारिणी ॥ उत्तरे धनधान्यानि ईशाने सुखसंप
दः ॥४४॥ मांगल्ये सर्वकार्येषु पटचक्रं विचारयेत् ॥ गर्गाचार्येण संप्रोक्तं ॥ सर्वसिद्धिप्रदायकं
॥४५॥ इति पटचक्रं ॥ ॥धाता द्वयं हस्तयोमैत्रं ॥ कृत्तियुग्मं करत्रयं ॥४६॥ पुनर्वसुद्वयं पूषा ॥ मूलं
चाप्युत्तरात्रयं ॥४७॥ विषमे वक्ररोमासः ॥ मार्गे मेषश्च फाल्गुने ॥ मकरं मिथुनं मीन ॥ लग्ने कन्या तु

त्रिप्रबो० लाधरः॥४७॥भौमार्किवर्जितावाराग्राह्यंतेचद्विरागमे।षष्ठिरिक्ताद्वादशीचाममावास्याचवर्जि
१० ता॥४८॥इतिद्विरागमनं॥ ॥सिमंतोन्नयनंकार्यं।आदित्येगुरुभौमयोः॥मृगेपुनर्वसुपुष्येहस्तेमूले
चवैष्णवे॥४९॥मासेषष्ठाष्टमेवापिनवमेवाकुलक्रमात्॥संस्कारःप्रथमेगर्भेपुंलग्नेपुंनवांशके
॥५०॥पुष्यकरेमूलमपिश्रुतिश्च।पुनर्वसुचापिमृगोनुतारा॥अथाश्विनीचाजपदैवमैत्रं।वसि
ष्ठपूर्वैरीदमप्पवादि।५१।काकस्यवंध्यास्रवतिचभुक्तेःमृतःप्रजापुंसवनेषुधेचामृत्फंचसारिप
यद्दानिचंद्रे।बपुपुःत्रलाभोरविजीवभौमे।५२।इतिसीमंतः।पुनर्वसुद्वयंहस्तत्रयेमैत्रद्वयं
मृगेमूलोत्तराधनिष्ठासु॥द्वादशैकादशेदिने॥५३॥अन्यत्रापिशुभेयोगेवारेबुधशशीकयो राम०
र्जानोगुरोस्थिरेलग्ने।बालनामकृतिसदा।५४।इतिनामकर्म॥मैत्रत्रयेहरीद्वेवेविधिद्वं १०
द्रेदितिद्वये॥स्वातिहस्तोत्तराषाढापूष्पार्यमहयेषुच।५५।सिंहत्रयेघटेलग्नेमासयोस्तिच

तुर्ययोः॥यात्रातिथौचनिःकासः।विशुभेवाकिंभौमयोः॥५६॥इतिनिःकासनं॥हस्तादिपंच
केश्विन्यां॥धनिष्ठायांचपूषणि॥गुरौशुक्रेबुधेवारेधार्यास्त्रिभिर्नवांबरं॥५७॥लग्नेमिनध्वक
न्याश्वमिथुनेचशुभप्रदः॥पुंसांपुनर्वसुद्वंद्वेरोहण्युत्तरभेषुच॥५८॥इतिवस्त्रपरिधानं॥नवान्न
भोजनेग्राह्यं।षस्त्रेप्रोक्तमतःपरं॥वारेधिकौसूर्यसौरिनक्षत्रेश्रवणेमृतंगः॥५९॥इतिनवा
न्नभोजनं॥ ॥आद्यान्नप्राशनेपूर्वासार्पार्द्रावसवेयमः॥नक्षत्रेषुपरित्याज्यावारेभौमार्कनंदनौ
॥६०॥द्वादशीसप्तमीरिक्तापूर्वानंदाष्टकवर्जिता॥लग्नेषुवृषभयाग्राह्या॥वृषकन्याचमन्मथः॥६१॥
शुक्लपक्षःशुभोयोगो॥संग्राह्यःशुभचंद्रमा॥मासौषष्ठाष्टमौपुंसांस्त्रीणांमासस्यपंचमः।६२
इतिप्रथमान्नप्राशनं॥ ॥पुनर्वसुद्वयेज्येष्ठामृगेचश्रवणद्वये॥हस्तत्रयेश्विरेवत्यां॥
शुक्लपक्षोत्तरायणे॥६३॥लग्नेगोधनकुंभेचामकरेम्मक्षयेतथा॥सौम्यवारेशुभेयोगेवृ

त्रिप्रबो॰ डाकर्मस्मृतंबुधैः॥६४॥चूडाकर्मणिवर्जस्स्यात्।जन्ममासाश्चजन्मभं॥रिक्ताषष्ठीचपर्वाणिप्रति॰
११ पंचतिथिष्टमी॥६५॥इतिचूलकर्मः॥ ॥हस्तत्रयेहरिद्वंद्वेपूर्वाश्वेमृगपंचके॥मूलेपुष्येचनक्षत्रे
बुधार्कौगुरुशुक्रयोः॥६६॥रेवास्यानेमीनचापेलग्नेवृषेचपंचमी।विद्यारंभोत्रयोवर्ज्योषष्ठ्यन॰
ध्यायनरिक्तिका॥६७॥इतिविद्यारंभः॥ ॥पूर्वाषाडाश्विनिहस्तात्रयेचश्रवणत्रयो।ज्येष्ठाना
ग्यमृगेपुष्ये॥रेवत्यांचोत्तराचये॥६८॥द्वितियायांत्रतियायांपंचम्यांदशमीत्रये॥शुक्रेसूर्येसूराचा
र्येवारेपक्षेतथासिते॥६९॥लग्नेवृषेव्रतुसिंहे।कन्यामकरयोरपि।व्रतबंधशुभेयोधगे।ब्रह्म
सूत्रविन्नंभवेत्॥७०॥कार्त्तिकेपौषमाघेवा।चैत्रेचफाल्गुनेपिवा।कर्णवेधप्रशस्तंति।शुक्ले॰ राम॰
पक्षेशुभेदिने॥७१॥इतिव्रतबंधः॥ ॥श्रुतित्रयदितिद्वंद्वौमैत्रहस्तत्रयोत्तरे॥लग्नेविद्वियुगे १२
मूले॥न्यूपाश्चेसौम्यवारके॥७२॥द्विस्वभावेघटेलग्ने।कर्णवेधशुभोभवेत्॥चैत्रपौषेहरेचा

पौवर्षेचयुगलंत्यजेत्॥७३॥इतिकर्णवेधः॥ ॥पुनर्वसुद्वयंचित्राविशाखाभरणीद्वयं॥मूल
माद्रीमघाहेया।श्रवणंदशमंतथा।७४॥भौमशुक्रबुधानारी।प्रसूतिस्नानकर्मणि॥हेयाप्रति
पद्षष्ठी।नवमिचतिथित्रयः॥७५॥इतिस्त्रीप्रसवानंतरस्नानं॥मूलादिचद्वयंग्राह्यं।श्रवण
श्चमृगःकरः॥जलजाध्यर्चनेहेयाः॥शुक्रमंदार्कभौमिजा॥७६॥इतिजलवापिपूजा॥ ॥अनुराधा
चतुष्केषु।मघादितियुगेकरेः॥स्वातिश्रुतिविधिद्वंद्वेरेवत्यांमुत्तरेषुच॥७७॥गोद्वयस्त्रीझषेहाला
कार्येहेयःशनिःकुजः॥षष्टिरिक्तादशीचैवद्वितियाद्वयपर्वच॥७८॥त्रिभिः।त्रिभिः।त्रिभिपंचत्रि
भित्रिभिःपंचत्रिभिर्द्वयं॥सूर्यर्ज्ञादिनभंयावद्धानिवृद्धिहलक्रमात्॥७९॥इतिहलारंभः॥पूर्वाषा
डादितिद्वंद्व।विधियुग्मंहरित्रयंअउत्तराफाल्गुनीहस्तात्रयमूलंचरेवति।८०।मैत्राश्विनिचलग्नोपि
सिंहकन्याघटोवृषः।मिथुनंमकरोग्राह्यो।वास्तुकर्मणिकोविदैः॥८१॥श्रावणश्चाश्वयवैशाख

कार्त्तिकः फाल्गुनस्तथा ॥ मासेषु मार्गशीर्षश्च । वास्तुकर्मणि शस्यते ॥ ८२ ॥ वज्रव्याघातशूला-
निव्यतिपातातिगंडयोः । विष्कुंभपरिघौ वर्ज्यौ । वारे भौमश्च भास्करः ॥ ८३ ॥ इति वास्तुकर्म ॥ ॥ अश्वि-
र्द्राभिषाश्लेषा विशाखा भरणिद्वयोः । ताज्या चद्वादशी रिक्ता । षष्टि चंद्रक्षयोष्टमी ॥ ८४ ॥ प्रतिपश्चति-
थौवारौ भौम्यशनिश्चरौ सदा ॥ पूर्वदेवप्रतिष्ठासु ॥ स्थिरलग्नोत्तरायणे ॥ ८५ ॥ इति देवप्रतिष्ठा ॥ कू-
पतडागादिप्रतिष्ठा ॥ ॥ विशाखा भरणी पूर्वा । हैयाश्लेषा मघास्तथा । अमावास्याः च रिक्ता च
भवारे भौमो रविस्तथा ॥ ८६ ॥ गृहप्रवेशो चैत्रस्य । पौषाषाढौ च कार्त्तिकाः ॥ अश्विनस्य स्थिरो लग्नो
याप्यो पहबुधैः सितः ॥ ८७ ॥ इति गृहप्रवेशः ॥ ॥ अनुराधात्रयं हस्तो । मृगाश्वो चादितिद्वयं । यात्रायां
रेवती शस्ता । निंद्या आर्द्रा भरणीद्वयं ॥ ८८ ॥ मघोत्तर विशाखा च । सर्पो वान्ये च मध्यमा ॥ षष्ठि रिक्ता द्वा-
दशी च पर्वाणि च विवर्जयेत् ॥ ८९ ॥ लग्ने कन्या मन्मथश्च । मकरश्च तुलाधरः ॥ यात्रा चंद्रबलो

कार्ये शकुनं च विचारयेत् ॥ ९० ॥ शनौ चंद्रे त्यजेत्पूर्वं । दक्षिणां च दिशां गुरौ ॥ सूर्ये शुक्रे च पश्चिमां
बुधे भौमे तथोत्तरां ॥ ९१ ॥ इति दिक्शूलः ॥ ॥ सर्वदिगामनो हस्तः । पुष्याश्वो श्रवणो मृगः ॥ सर्वसि-
द्धिकरः पुष्यो । विद्यायां च गुरुस्तथा ॥ ९२ ॥ इति सर्वदिग्गमनं ॥ ॥ प्रतिपन्नवम्यां च । पूर्वस्यां
दिशि योगिनी अग्निकोणे तृतीयायां । मेकादश्यां च सा स्मृता ॥ ९३ ॥ त्रयोदश्यां च पंचम्यां । दक्षिण-
स्यां शिवप्रिया ॥ द्वादश्यां च चतुर्थ्यां च । नैरृत्ये कोणगामिनी ॥ ९४ ॥ षष्ठ्यां चैव चतुर्दश्यां । पश्चिमायां
गनिर्भवेत् ॥ पूर्णिमायां च सप्तम्यां । वायुकोणे च पार्वती ॥ ९५ ॥ दशम्यां च द्वितीयायां । मुत्तरस्यां शिवा
भवेत् ॥ ईशानकोणे चाष्टम्यां ॥ अमावास्यां शैलराजता ॥ ९६ ॥ योगिनी सुखदा वामे । पृष्ठे वांछितदायि-
नी । दक्षिणे धनहंत्री च । सन्मुखे मरणं ध्रुवं ॥ ९७ ॥ इति योगिनिः ॥ ॥ मासस्य प्रतिपद् श्रेष्ठा । द्विं-
तिया कार्यकारिणी ॥ आरोग्यदा तृतीया च । चतुर्थी कलहप्रदा ॥ ९८ ॥ पंचमी च श्रीया नित्यं । षष्ठि

चकलहस्तदा॥ जलपानसमायुक्ता। सप्तमीसूत्रेरवदा प्रियः॥८८॥ अष्टमीमरणंध्रुवं॥ दशमी
नृमिलानस्य॥ एकादशापिहेमेदा॥ २००॥ द्वादशी प्राणसंदेहा। सर्वसिद्धात्रयोदशी॥ शुक्लावा
यदिवाकृष्णावर्जनीयाचतुर्दशी॥ ॥२१॥ पूर्णिमास्यामभावस्यां प्रस्थानंनैवकारयेत्॥ तिथिच
येतिमासांते। ग्रहणांतेदिनत्रयं॥ ॥ २॥ अष्टासुप्रहरार्धेषुप्रथमा सैद्यैकदनिर्ऋतां। पूर्वस्यांवामतो
राहुः॥ रूक्षषांतुर्यादिशंव्रजेत्॥ ३॥ जयायदक्षिणेराहू। योगिनीवामतःशुभाः॥ ४॥ इति राहु
चक्रं॥ ॥ चंद्रश्चरतिपूर्वादि। क्रमेणदिक्चतुष्टयं॥ मेषादिकेषुयात्रायां सन्मुखश्चैषशोभनाय
इतिचंद्रचक्रं॥ ॥ ॥ यामयुग्मेषुरात्रौचवामे पूर्वादिरवि। यात्रास्मिनदक्षिणेवामे। प्रवेशःशु
येद्वयोः॥ इतिरविचक्रं॥ ॥ सूर्यनादशमे षष्टे। चतुर्थेचांके त्रयोदशे। विंशतिश्चर वियोगाः
पट्कयोगस्यनाशकः॥ ७॥ इतिरवियोगः॥ ॥ मनुनातुदीनरात्रौलारसवेदाश्विनक्रमात्॥ राम
१३

रविवारान्मुहूर्तोयं। उल्लिकोनिंदितःशुभे॥ ८॥ इतिमहूर्तउल्लिकः॥ ॥ गतानाडीद्विगुणिता
पंचभिश्चविभाजिता॥ सूर्यशुक्रबुधाश्चंद्रो॥ मंदजीवकुजाक्रमात्॥ ९॥ इतिमहूर्तदेवता
॥ तिथिवारंचनक्षत्रं नामाक्षरसमन्वितं॥ द्विनीश्चतुर्भिर्गुणितं रससप्ताष्टभाजितं॥ १०॥ आदिशु
न्येभवेदहानि मध्येशून्येरिपोर्भयं। अंत्यशुन्ये भवेन्मृत्युः सर्वांकेविजयीभवेत्॥ ११॥ इतिसर्वांग
योगः॥ प्रतिप्रवादेगमनादिशस्ले॥ १२॥ इतियोत्राः॥ दक्षिणेदुःखदःशुक्रे। सन्मुखेहंतिलोच
नं॥ वामेपृष्टेशुभोनित्यं। रोधयेदस्तगःशुभः॥ १३॥ इतिशुक्रदोषः॥ ॥ विद्यारंभेगुरुश्रेष्ठ मिध्यो
रविभार्गवौ। अन्यग्रासोबुधेचंद्रे। जायेमृत्युःशनौकुजौ॥ १४॥ इतिधनुविद्यारंभः॥ ॥ पूर्वाभा
नाद्रपदयुग्मंस्वातिचश्रवणोश्विनी। हस्तोत्तरामृगोमैत्रं। तथाश्लेषाचरेवति॥ १५॥ आद्युरुदा
णि चैतानि। क्रयविक्रयणंशुभो चंद्रभार्गवजीवाश्च॥ वाराःशाकुनमुत्तमं॥ १६॥ इतिक्रयविक्रय

पूर्वप्रवादनमग नाहिकिंचनापि दृष्टयिस्मा हनुमानमागारिकेचभागेविफलं समस्तं॥ ७॥

हस्ता दि पंच पूषाश्च धनिष्ठा हकांचनं। रक्तं परिदधे वस्त्रं। नौमार्कगुरुभार्गवे॥१७॥ इति रत्नवस्त्र
सुवर्णादि परिधानं॥ ॥धनिष्ठाद्यं चकेत्याज्य। स्तृणकाष्ठादि संग्रहः॥ भयाद्दक्षिणदिग्यात्रागृ
हाणां छादनं तथा॥१८॥ इति पंचकः॥ ॥तैलाभ्यंगे रवेतापः सोमे शोभा कुजे मृतिः॥ बुधे धनं गु
रुहानिः। शुक्रे दुःखं शनौ सुखं॥१९॥ इति तैलाभ्यंगः॥ ॥हस्तत्रये ब्रह्मगे मघायां॥ पूष्ये धनिष्ठा
श्रवणोत्तरेषु मूलानुराधा दस्र रेवतिषु। स्थिरेषु जग्मेषु वधूप्रवेशः॥२०॥ सूर्ये रोगः कुजे मृत्यु वि
धव्यं च बुधे स्मृतः॥ जीव चंद्रार्कि शुक्रेषु प्रवेशो सं पदे वधूः॥२१॥ नंदायां पूत्र जननि। मृत्युश्च
चैव भद्रयो। जयापूर्णा भ्रजेष्ठा। द्विरिक्तासां तां पकारिणी॥२२॥ इति वधूप्रवेशः॥ ॥अश्लेषा
द्वितयं स्वाति। रोहणी च पुनर्वसु॥ रोगी स्नाने रेवति चा वर्ज्ययेदुत्तरात्रयं॥२३॥ रिक्तातिथौ चर
लग्ने। वारे चर विनोभयो॥ स्नानं च रोगिणां प्रोक्तं॥ द्विजं भोजनं सुयुतं॥२४॥ इति रोगीस्नानं

आनंद काल दंडश्च। धूम्राख्योथ प्रजापतिः॥ सौम्यो ध्वांक्षो ध्वजश्चा पि। श्रीवत्सो वज्रमुद्गरौ॥२५
छत्रं मित्रं मानसाख्यं। पद्मो ध्वांक्षं बकस्तथा॥ उत्पात मृत्यु काणश्च। सिद्धि श्चाथ शुभो मृतः॥२६
मुशल गद मातंगो। राक्षसश्च चरा स्थिरः॥ वर्द्धमानश्च विज्ञेया। अष्टा विंशति रिमा मिः॥२७॥ फलसदृना
मसदृशो योगा दैवज्ञभाषिताः॥ अश्विनि रविवारे श्वेद्योगा ह्यानंद संज्ञिकः॥२८॥ मृगशीर्षा शशिन
रश्मा। वश्लेषा क्षितिनंदने॥ बुधे हस्तानुराधा च देवराज पुरोहितः॥२९॥ भार्गवे श्चैवोत्तराषाढः॥ श
नौ शततभिषा यदा॥ तदानंदा ह्वयोगस्मात्॥ कालदंडादयः क्रमात्॥३०॥ इति नक्षत्र वारे आनं
दादि योगः॥ ॥हस्तः सूर्ये मृग सोमे। वारे भौमे तथाश्विनी॥ बुधे मैत्रो गुरु पूष्यो। रेवति भृगुनं
दने॥ रोहिणी सूर्यपूत्रेण। सर्वसिद्धि प्रदायकः॥ असावमृत सिद्धिश्च। योगः प्रोक्त पुरातनैः॥
इति अमृत सिद्धि योगः॥ ॥विशाखादि चतुष्केषु। रवि वारक्रमेण च। उत्पात मृत्यु काणश्च सिद्धि योग

प्रकीर्त्तिताः॥३३॥ इति उत्पातमृत्युकाणसिद्धियोगः॥ ॥तिथ्यंकेन समायुक्तो। वारांको पञ्च
जायते॥ त्रयोदशीकः क्रकचो। योगो गार्गिनिंद्यस्तथा शुभे॥३४॥ इति क्रकचयोगः॥ ॥मघा सूर्ये वि
शाखेंदौ। सौमा चार्द्रा गुरौ नकृत्ती॥ बुधे मूलं विरोधिः शुक्रे:। यमघंटश्च नौकरः॥३५॥ इति यम
घंटयोगः॥ ॥नंदा सूर्ये मंगले च। भद्रा भार्गवचंद्रयो बुधे जया गुरौ रिक्ता। शनौ पूर्णा च मृत्युदा
३६॥ इति मृत्युयोगः॥ ॥अंधाक्षं चिपिटाक्षं च। काणाक्षं दिव्यलोचने। गणयेद्रोहिणीपूर्वं
सप्तवारानुक्रमात्॥३७॥ अंधे च लभ्यते शीघ्रं मंदनेत्रे च मासतः॥ चिपटे श्रूयते वार्त्ता सुने
त्रे नैव लभ्यते॥३८॥ अंधनेत्रे गते पूर्वे। काणाक्षे दक्षिणे तथा॥ चिपटे पश्चिमे याति। दिव्यचक्षु
त्रिरुत्तरं॥३९॥ इति अंधादि चतुर्नक्षत्रफलं॥ ॥पुनर्वसु मृगश्चार्द्रा। ज्येष्ठा मैत्रं करस्तथा॥
पूर्वाषाढोत्तराषाढौ मूलं दक्षिणचारिणी॥४०॥ अश्विनी भरणी स्वाती। विशाखा फाल्गुनीद्वयं॥

मघा भाद्रपदायुग्मं नव चोत्तरचारिणः॥४१॥ कृत्तिका रोहिणी पुष्य। चित्राश्लेषा च रेवती॥ शतं धनिष्ठा
श्रवणं। नवैव मध्यचारिणः॥४२॥ भ्रमंति तद्दिशो वत्सो। मासानां च त्रिकं त्रिकं। भाद्रो भाद्रपदं कृत्वा म
थुने दिक्षु चतुष्टयं॥४३॥ यात्रा विवाद संबंधं। द्वारं च ग्रहणं हर्म्ययो नूतने मिलनं शुभं। वत्सस्याभिमुखं
त्यजेत्॥४४॥ त्रयं त्रयं मेषश्रेणौ। षड्विधौ पंच मृगे त्रयं॥ एकमार्द्रासु नक्षत्रं। चत्वारि च पुनर्वसु॥४५॥
पुष्ये त्रयं रससर्पे। मघायां भानि पंच च॥ द्वयं द्वयं च फाल्गुन्यो। त्रयं चैपौ फा हस्ते षु पंच च॥४६॥ चित्रा
स्वातौ रेकमेकं। चतुर्धं च द्विदैवते॥ त्रयं सानुराधायां। ज्येष्ठायां च त्रयं स्मृतं॥४७॥ मूले रुद्रा चतुर्थं च।
पूर्वाषाढोत्तरे यो नरे। त्रयं चाभिजितं प्रोक्तं। श्रवणं च त्रयं स्मृतं॥४८॥ धनिष्ठा च चत्वारि च शततारं मिषासु
चाद्वयं द्वयं भाद्रयोश्च। द्वात्रिंशाद्परि रेवति॥४९॥ इति नक्षत्रनाराचं॥ ॥जन्मे दृष्टमेवापे स्वर्ये। क्षेत्रपालोश्च दु
र्गं॥ आकाश देव्याश्च देतु लग्ने पष्टेष्ट मेव्यये॥५०॥ द्वादशे दशमे सौमे। शाकिन्यौ दुःखं स्मृतं। तनदेवी भव

त्रि॰घ॰बो॰ दोषः।सप्तमेष्वा दशे बुधे॥५१॥ यामित्रेष्वाद्दशेजीवे। दैषैव दोषो निगद्यते॥ अष्टे व्यये दैत्यपूज्ये। जलदे-
१६ घाश्चदूषणं॥५२॥ शनिश्चरे व्यये चास्ते। दोषस्याद्वात्मवात्मज॥ यामित्रेष्वाद्दशोराशौ हो। अगतिज्ञानिदूष-
णं॥५३॥ पित्तदोषो भवेन्मेषे। क्षुधाहानि विनर्मना। वृषे गगनदेव्याश्च॥ ज्वरकुंडे अलन्नेनेत्ररुक्॥५४
मिथुने चमाहामाया। दोषो वेला ज्वरो निलः॥ कर्के च शाकिनी दोषो। हास्यरोदनमौनता॥५५॥ सिं-
हे जले प्रेतदोषो। दिवा स्त्रीतो ज्वरो रुचिः॥ ग्रहदोषश्च कन्यायां। क्रोधालस्यानुविन्मथा॥५६॥ क्षेत्रपाल
भवेद्दोषो। स्तुले संतापपिडनं॥ वृश्चिके नागदोषश्च। ज्वरदेहे कुबुद्धिमाः॥५७॥ चापे देहभवे दोषो। ज्वर
देहे कुबुद्धिमाः॥५७॥ चापे दे कुबुद्धिमा॥ भवे दोषो। ज्वरशाकोदरव्यथाः मकरे चंडिका दोषो देहभंग राम॰
ज्वरनिलाः॥५८॥ मलिनप्रेतदोषश्च। कुंभे देहसपिडनं॥ मीने च योगिदोषो। ज्वरो जंघास्तद्दर्शनं॥५९ १६
व्यये धर्मेत्रतियेच॥ षष्टे पापग्रहो यदि॥ हते गदे जले शस्त्रे। तस्य दोषः कुलोद्भवः॥६०॥ शनौ जले

कुजे सस्त्रे। गदे सूर्ये स्ववंशजः॥ राहौ नो विकृतो नष्टः॥ शांतिपूजाद्विजार्चनैः॥६१॥ स्वद्दे त्रेगोः। त्रजो
दोषः पित्रैस्क्षेत्रे परोद्भवः। चातुर्हेत्रे परोद्भवः॥६२॥ इति दोषपूपृच्छा तानं॥ ॥ आदित्या चाश्विनी हस्तो
पूष्यमूलो तरात्रयं। सिद्धिः योगधनिष्टा च। तिथिरप्यष्टमी तथा॥६३॥ सूर्ये विशाखा भरणी। ज्येष्टामे
त्रौमघास्तथा॥ चतुर्दशी द्वादशी च। विरुद्धासप्तमितया॥६४॥ सोमे पूष्यानुराधा च। श्रवणे रोहिणी
मृगः॥ नवमिदशमि चापि। सिद्धियोगाप्रकिर्तिता॥६५॥ चंद्रे चित्रा विशाखा च तथाषाढद्वयं बुधैः॥
एकादशी द्वादशीत्र षष्ठि। वर्जुनीयात्रयोदशी॥६६॥ भौमे मूलो श्विनी सर्पा। मृगश्चो तरभाद्रपदा॥ द्विती
षष्ठि त्रतियाच। अष्टमि च त्रयोदशी॥६७॥ भौमे शतभिषार्द्रा च॥ धनिष्टा पूर्वभाद्रपात्॥ मघा च
चोत्तराषाढो॥ द्वितिया दशमि तथा॥६८॥ बुधे नुराधा पूष्ये च कर्तिकारोहणि मृगः॥ सिद्धियोगा
द्वादशी च। द्वितिया सप्तमितिथौ॥६९॥ बुधे मूलाधनिष्टा च। रेवती चाश्विनी यमः। तृतिया नवमि

शीघ्रबो· ७ चापि वर्ज्या प्रतिपदा तिथौ ॥७०॥ गुरौ पुष्यो विशाखा च मैत्रं पौष्णं पुनर्वसु ॥ सिद्धियोगः पूर्णिमा चाद
ष्टमि पंचमि तिथौ ॥७१॥ जीवेन्दोतन्निषादौ च कृत्तिको त्तरफाल्गुनी ॥ विधिमृगौ ष्टमी षष्टी चतुर्थिं च वि
वर्जयेत् ॥७२॥ शुक्रे चित्रा र्यमा पूषा ॥ श्रवणाश्वि पुनर्वसु ॥ सिद्धाः चैकादशी षष्टि प्रतिपत्त्त्रयोदशि
७३॥ मार्गवे रोहणी पूष्यो ॥ ज्येष्टाश्लेषा मघास्तथा ॥ द्वितियासप्तमि चापि वर्जनीयास्तथा बुधैः ॥
॥७४॥ शनौ च रोहणि स्वाति ॥ श्रवणः पूर्वाफाल्गुनी ॥ मघा च नवमि सिद्धाः चतुर्थी च चतुर्दशी ॥७५
शनौ हस्तो त्तराषाढौ ॥ चित्रा चोत्तरफाल्गुनी ॥ रेवती च सदा वर्ज्या ॥ तिथि षष्टि च सप्तमी ॥७६॥ इति
योगावयोगप्रकरणं ॥ ॥ चरं चलं स्मृतं स्वाति ॥ पुनर्वसु श्रवित्रयं ॥ ध्रुवं स्थिरं विनिर्दिष्टं रोहिणि एम· ७
चोत्तरात्रयं ॥७७॥ तिक्ष्णं दारुणमश्लेषा ज्येष्टार्द्रा मूलमेव च ॥ लघु क्षीप्रं स्मृतं पूष्यो हस्ताश्विन्य
भिजित्तथा ॥७८॥ मृदु मैत्रं स्मृतं चित्रा ॥ नुराधा रेवति मृगः ॥ मिश्रं साधारणं प्रोक्तं विशाखा कृत्तिका

नथा ॥७९॥ पूर्वात्रयं यमश्चैव ॥ मघा उग्रस्तथैव च ॥ नक्षत्रेष्वपि वा कार्याणि ॥ नामतुल्यानि कारयेत् ॥
८०॥ इति नक्षत्रनामासंज्ञानिः ॥ ॥ शनिचक्रं नराकारं ॥ लिखयत्र शनि र्भवेत् ॥ तन्नक्षत्रं मुखे दत्वा
॥ यावन्नामनरस्य च ॥८१॥ तावद्दिवस्ये नक्षत्र ॥ ज्ञेयं शुभमथाशुभं ॥ एकं मुखे च नक्षत्रं ॥ चत्वारि दक्षिणे
करो ८२॥ त्रयं त्रयं पादयो श्च धोवामहस्त चतुष्टयं ॥ हृदये पंच त्रयं मौलौ ॥ मेत्रे गुह्ये द्वयं द्वयं ॥ ८३॥ हा
निरीसे दक्षणे हस्ते ॥ लाभो वामे च रोगिता ॥ इह हि श्री र्मस्तके राज्यं ॥ पादे पर्पटनं सदा ॥ ८४॥ इति शनि व
चक्रं ॥ ॥ मेषे शनौ गुरुं र्जरेषु पञ्चासे चार्बुदे हवे ॥ मिथुने जायते पिडा ॥ मरुस्थली मूलेषु च ॥८५॥ कर्कि
काश्मीरके वाधौ ॥ इंद्रप्रस्थे मृगा द्विपे ॥ शनिश्चरस्थरे कन्यायां ॥ मानवा यांति सद्भयं ॥८६॥ तुला
वृश्चिक चापेषु यदी यांति शनिश्चरः ॥ नवर्षति तदा मेघा ॥ पृथ्वि दुर्भिक्षः पीडिता ॥८७॥ कुंभ मक
रे मीने जायते बहुधा शनौ ॥ मिने च सर्वलोकानां ॥ दुर्भिक्षेण क्षयो न भवेत् ॥८८॥ इति शनिचारफलं

शिघ्रबो· यत्रमासे रविवाराः जायते पंचसंततः ॥ दुर्भिक्षं तत्र भंगश्च नत्रास्ते वे महीक्षयं ॥८९॥ सोमस्य पंचवा
१८ राश्च यत्रमासे भवंति च ॥ धनधान्यसमृद्धिश्च सुखं भवति सर्वदा ॥९०॥ यत्रमासे मंगलस्य जायते
पंचवासराः ॥ रक्तेन पूरिता पृथ्वी छत्रभंगस्तदा भवेत् ॥९१॥ बुधस्य पंचवाराश्च यत्रमासे निरंतरं ।
प्रजानां सुखमत्यंतं सुखं महर्घं च प्रजायते ॥९२॥ यत्रमासे पंचवाराः जायते च बृहस्पतिः । विग्रहं पश्चि
मे देशे खड्गयुद्धं च जायते ॥९३॥ शुक्रस्य पंचवाराश्च यत्रमासे निरंतरं ॥ प्रजावृद्धिः सुभिक्षं चासु
खं चैव तत्र प्रवर्त्तते ॥९४॥ शनैश्चरे पंचकं दृष्ट्वा पाताले कंपते फणिः । ईशाने देशभंगश्च वह्निरोहे
महर्घता ॥९५॥ इति मासे पंचवारफलं ॥ ॥ अंगुल्यो विंशतिः सूर्ये शंकुः सोमे च षोडश । भौमे राम
पंचदशांगुल्यो बुधवारे चतुर्दश ॥९६॥ त्रयोदश गुरोर्वारे द्वादशार्कजशुक्रयोः । तत्रो को १८
मूलीय शाछाया ॥ मध्याह्ने च प्रजायते ॥९७॥ तदार्द्धे वा भिनि दृष्या । घटीकैकोनता बुधैः । अत्र

अत्र कार्याणि सर्वाणि ॥ सिद्धिवांनि क्रमात्तानि ॥९८॥ जातोभिजिति राजा स्या व्यापारे सिद्धिरुत्तमा
॥९९॥ इति अभिजिन्मुहूर्त्तफलं ॥ ॥ अर्घवृद्धिः फाल्गुने स्यात् ॥ चैत्रे च सतु संपदः ॥ वैशाखे विग्रहो रा
ज्ञां ज्येष्ठे वृष्टिश्च भूयसी ॥१००॥ आषाढे चोदिते शुक्रे जलं भवति दुर्लभं ॥ श्रावणे च पशोः पीडा
भाद्रे धान्यसमृद्धयः ॥१॥ आश्विने सर्वसंपत्ति ॥ शुभं कार्त्तिकमार्गयोः ॥ पौषमाघे छत्रभंगो यद्युदेति
भृगोसुतः ॥२॥ इति भृगुदयफलं ॥ ॥ पूर्ववायुर्होलिकायां प्रजाभूपालयोः सुखं ॥ पलायनं च दु
र्भिक्षं दक्षिणे जायते ध्रुवं ॥३॥ पश्चिमे तृणसंपत्तिरुत्तरे धान्यसंभवः ॥ यदि खे च शिखा दा दृष्टिर्दु
र्गराजा च संक्षयेत् ॥४॥ इति होलीकाफलं ॥ ॥ एकादश्यां कार्त्तिकस्य यदि मेघाः समिद्धाये
आषाढे च तथा वृष्टिः जायते नात्र संशयः ॥५॥ मार्गशीर्षे च चाष्टम्यां दृश्यते विद्युतो यदा ॥ त
स्माद्भाद्रपदे मासे वृष्टिर्भवति भूयसी ॥६॥ कृष्णपक्षे दशम्यां च वृष्टिः पौषस्य जायते ॥ तदा

शि.प्र.बो. ष्टिश्चावणे च। मासे संजायते ध्रुवं॥७॥ वृष्टिश्च माघसप्तम्यां ज्येष्टमूले न वर्षति॥ नक्षत्र वा रिवा
१९ हस्त। तदन्नै पूर्यये न्महि॥८॥ पंचम्यां प्रथमे पक्षे। श्रावणस्य च वर्षति॥ पयोवाहस्तदा धान्ये:। धरा
व्याघ्राजपि॥९॥ नवरा षाढके श्वाना। पिडा कंटकसंगति॥ ज्येष्टस्य प्रथमे पक्षे। प्रतिपद्यां यदा न
वोत्॥१०॥ रेवी रस्त दृष्यायूर्वा तिष्ट व्रांतकारकः॥ अस्तं तविग्रहा नौमे दुर्भिक्ष सुखके तदा॥११॥ अ
नावृष्टिर्न्निवारो जलं क्वापि न जम्यते। सोमशुक्र सुरेज्यानां यदि वार प्रजायते॥१२॥ धनधान्यस
तोत्पत्ति ग्रहे ग्रहे महोत्सवः॥ पौषमासस्य संक्रांतौ॥ रवे वारे र्यस्य भवेत्॥ धान्यस्य द्विगुणं भौमे त्व नौ
म वारे चतुर्गुणं॥१३॥ त्रिगुणं शनिवारे च। बुधे शुक्रे समं भवेत्॥ सूराचार्ये च सोमे च मौल मर्घं तु राम.
निश्चितं॥१४॥ मिन संक्रमणे सूर्ये। वारे चैव समीरणः॥ भौमेपी डाप शुनां च दुर्भिक्षं तु शनैश्चरे॥ १९
॥१५॥ संक्रांतौ यदि मीनस्य। बुधवारः प्रजायते। भूतत्रं गेम हामारी। रूद्रसं त्यय चित्रता:॥१६

संक्रांतौ सोमवारेषु। प्रजानां परमं सुखं॥ भानुभौमार्कि वारेषु। पापयुद्धे महर्घता॥१७॥ संक्रांति धर
नक्षत्र। वृष्या भोगो वृथा वस्त्रं। हानिश्च विमूलं धनं। षष्टै द्वे नागे फलं षट्कं॥ मासिमा सि विचारयेत्॥१८
इति शिनि संक्रांति फलं॥॥ राशिचक्रं लिखित्वादौ। मेषसंक्रांतिमादिकं॥ अष्टाविंशति कं तत्रालि
खेनक्षत्र मंडलं॥१९॥ सिंधूद्वयं द्वयं तै रत्वा। द न्यं च त्रैक मेव च॥ चत्वारः सागरा तत्र। संध्ययेः ऋष्ट
संज्ञया॥२०॥ शृंगाणि तत्र चत्वारि। तदा न्यष्टौ स्मृतानि च॥ रोहणि पतिता यत्रा तत्रैयं शुभाशुभं॥२१
यतो जलमयस्यैषा। चंद्रस्य परमा प्रियः॥ समुद्रेषु महावृष्टिस्तु रेवष्टिश्च तोमना:॥२२॥ पर्वते बिंदु
मात्रा स्यात्॥ षंड वृष्टिश्च संधिषू॥२३॥ इति समुद्र चक्रं॥ ॥नराकारं लिखेच्चक्रं। सूर्ये यत्र व्यवस्थि
तं॥ तन्नक्षत्रादिकं कृत्वा त्रयं दद्याच्च मस्तके॥२४ मुखे त्रयं स्कंधयोश्च। दद्यादेवो क मेव च॥ हस्तद
येन थैकेकं। पाणौ रप्येककः स्तथा॥२५॥ हृदि पंच गुदे चैकं। नाभौ चैकं प्रदापयेत्॥ जंघयोरे

कमेकंचाषडाडपादयोर्द्वयो।२६॥मस्तकेपट्टबंधिःस्यात्।मुखेमिष्टान्नभोजनं॥स्कंधेगतस्कं

धगामीवामीहौस्थानचूतोभवेत्।२७॥पाणौचजायतेचौरो।हृदयेचेश्वरोनरः॥स्वल्पतोपीभवेत्रा
णौ।परदाहरतोगुदे।२८।जंघयोपरदेशीस्या।द्व्लायूक्ष्मपदद्वये॥चक्रेचसूर्यनक्षत्राजन्मभाव।
धिगएयते॥२९॥इतिसूर्याक्रांतिनरचक्रं॥ ॥ग्रामोयत्रभवेदृक्षो।तद्द्वासप्तमस्तके॥दृष्टेसद्वृद
येज्ञेयाःसप्तपादेचतारकः॥३०।मस्तकेचधनीमन्यपृष्टेहीनश्चनिर्धनः।हृदयेसुखसंपत्तिःपा
दयोप्यटनेफलं॥३१॥इतिग्रामवासफलं॥ ॥मूलेष्टौमूलहृक्षस्याघटीकापरीकीर्तिताः।स्कंधेष
डाहूघटीका॥त्वचैवैकादशस्मृताः॥३२॥शाखायांचनवप्रोक्ताःपत्रेप्रोक्ताचतुर्दश।पुष्पेपंच
फलेवेदा।शिखायांचत्रयस्मृतं।३३॥मूलेनाशोहिमूलस्य।स्कंधेहानिधनक्षयं॥त्वचाच्चान्तविना
शायशाखायांमातृपिडनं।३४।परिवारक्षयंपत्रे।पुष्पेमंत्रिचभूपतिः॥फलेराजाशिखायांस्यां

दल्पजीविचबालकाः।३५॥इतिमूलंनक्षत्रफलं॥ ॥रेवत्यादिमृगांतेच।यावत्तिष्टतिचंद्रमाः॥शुक्रा
स्तावद्भवेदंधःसन्मुखोदक्षिणोपिवा।३६।पाकपश्चादुरीतश्चुत्रपंचसप्तदिनेशिशुः।विपरीतंतुह
स्वं।नद्वदेवगुरोरपि।३७॥त्रितियेदशमेषष्टेसदासूर्यशुभावहः।प्रथमेदशमेशशी।३८।शुक्लप
क्षेद्वितियेच।पंचमोनमोशुभः॥ताराशुभग्रहाःसर्वास्त्रिपंचमीताराः।सप्तवर्जिताराःसप्तमैवव
र्णेभवेत्॥४०॥जन्मसंपद्विपक्षेम।प्रत्यरिसाधकोवधः॥मैत्र्यातिमैत्रताराःस्फुः।त्रिरावृत्तं
नवैवहि॥४१॥त्रिषष्टदशमोभौमो।राहूकेतुशनिःशुभः॥षष्टेष्टमेद्वितियेच।चतुर्थेदशमेशु
भः॥४२॥द्वितियोपंचमोजीवः॥सप्तमेनवमेशुभः॥विहायशुक्रदशमं।षष्टेचसप्तमेशुभः।
भः।४३।एकादशोग्रहाःसर्वे।सर्वकार्येषुशोभनाः॥ग्रहाणांगोचरस्यैवं।फलंविज्ञैःशुभाशु
भं॥४४॥इतिग्रहगोचरफलं॥ ॥दशाम्यवधिक्रमेतु।पक्षेपूर्णोहिचंद्रमाः॥ततःपरंहि

शिघ्रबो· एवं द्वे शुभं कर्म विवर्जयेत्॥४५॥पुनर्वसुद्वयं शौरे।कृत्तित्रयकरत्रये॥रेवतिद्वितयं ज्येष्ठा
२२। मृगशीर्षं च गृह्यते॥४६॥पुनर्वसुः शौरे प्राणहरित्याज्या।मघा मैत्रं च रोहिणी॥उत्तराकृत्तिकावारु
णानुनैमध्यनिश्वरः॥४७॥रिक्ता हेयाष्टमी षष्ठी शौरे चं द्रक्षयो निशाः॥संध्याविष्टितगंडांता॥
नोज्झनं तच्छगो ग्रहि॥४८॥इति नित्यचौरः॥ ॥रेवति द्वितये पूष्ये।रोहिण्यां मृगमैत्रयोः॥श्रव
णोत्तरत्र्यर्केषु।राज्ञां स्यादभिषेचनं॥इति राजाभिषेकः॥ ॥रेवति पूर्वज्येष्ठा च।मैत्रहस्तत्रयं
मृगः पुनर्वसु खौ श्वविज्ञेयो॥गणस्तीर्यङ्मुखो बुधैः॥५०॥बिजारोप्यं च वाणिज्यं।सर्वसिद्धिप्रका
रयेत्॥वाहना निचयं त्राणि।दमनं च विवर्जयेत्॥५१॥पूर्वत्रियं मघाश्लेषा।विशाखा कृत्ति· एम·
कायमः।मूलं चाधमुखो ज्ञेया।नवको यं गणो बुधैः॥५२॥दुकार्यमुग्रकार्यं च।खननं विवरस्य चायूहं २२
चाधोमुखं यत्तत्कार्यं कारयेद् बुधः॥५३॥उत्तरात्रितयं पूष्यो।रोहिणार्द्राश्रुतित्रये॥ऊर्द्ध्व वक्त्रगणो ज्ञेयो

नक्षत्राणामनीषिभिः॥५४॥प्रासादछत्रगेहानि॥प्राकारध्वजतोरणं॥राजाभिषेकमंत्रं च कूर्या
ऊर्द्ध्वमुखे गणे॥५५॥इति अधोऊर्द्ध्वतिर्यमुखनक्षत्राणि॥ ॥सोमशुक्रसुरेज्यानां।वाराः शा
कुनमुत्तमं॥जन्मेषु चापमीने च।वृषोमासस्तुलाधरः॥५६॥पुनर्वसुद्वयं पूषा।मृगाश्वौ च करत्रयं
।मूलं श्रुतित्रयं मैत्रं।भिषक्कर्माणि गृह्यते॥५७॥इति भैषज्यकर्मः॥ ॥अमावास्याष्टमीत्याज्या
पूर्णिमा च चतुर्दशी॥रविवारो वर्ज्यनियोगे पशूनां विनिर्गमे॥५८॥चीत्रोत्तरा रोहिणीच।श्रवणे
पि विवर्जितः।एतेषु पशुजातिनां।पशुर्न निर्गमे भवेत्॥५९॥इति पशुनिर्गमः॥ ॥उत्तरासु वि
शाखायां।रोहिण्यां च पुनर्वसु।नवम्यां च चतुर्दश्यां॥अष्टम्यां नानयेत्पशु॥६१॥इति पशुप्रवेशः
॥ ॥पूर्वमित्रद्वयं मूलं।वसवो रेवति करः॥पुनर्वसुद्वयं याह्यं पशूनां क्रयविक्रये॥६२॥इति पशु
क्रयविक्रयः॥ ॥नंदा तिथ्यं नामादौ च पूर्वानां च तथांतिके॥घटीकैका शुभे त्याज्या।तिथिगंडो य

त्रिघ्रबो· मुच्यते।६३।ज्येष्ठाश्लेषारेवतीनां।मंतेघटीकाद्वयं॥ अश्विनीमूलमघाद्यानां।गंडे घटीकाद्वयं
२२ ६४॥मीनवृश्चिककर्कांतो घटिकार्द्धं परित्यजेत्॥ आदौमेषस्यचापस्य। सिंहस्यघटीकार्द्ध
कं।६५।तिथीगंडेनागंडेचालग्नगंडेचजातकः।न जीवतियदाजातौ।जीवमेषधनि
र्धनेत्।६६।इतिगडांतफलं॥ ॥सप्तम्यांचरवेर्वारो।बुधस्यप्रतिपद्दीने॥संवर्त्ता
ख्यस्तदायोगो।वर्जितव्यःसदाशुभे॥६७॥इतिसंवर्त्ताद्दियोगः॥ ॥नंदाशुक्रेबुधेभ
द्रा।शनौरीक्ताकुजेजया॥गुरौपूर्णातिथिर्ज्ञेया।सिद्धियोगाप्रकीर्त्तिताः।६८।इतिसिद्धियोगः
॥ ॥विष्कुंभप्रीतिरायुष्मान्सौभाग्यशोभनस्तथा॥अतिगंडसुकर्मा।चधृतिःशूल राम
स्तथैवच॥६९॥गंडोवृद्धिध्रुवश्चैव।व्याघातोहर्षणस्तथा।वज्रसिद्धिव्यतिपात।वरीयान् २२
परीघशिवः।७०॥सिद्धसाध्यशुभशुक्लः।ब्रह्मैन्द्रोवैधृतिक्रमात्॥सप्तविंशतिराख्याता।

नामतुल्यफलंस्मृमी।७१।इतियोगः॥ ॥बवंचबालवःश्चैव।कौलवंस्तैतिलस्तथा॥गरस्ववणिजोविष्टि।
।करणानिसप्तानिच॥७२॥कृष्णपक्षेचतुर्दश्यां।शकुनीपश्चिमेदले॥चतुःपादस्यनागस्य।अमावास्यां
।शकुनीपश्चिमेदले।चतुर्दलेद्वये॥७३॥शुक्लप्रतिपदायाश्च।किंस्तुघ्नप्रथमेदले।स्थिराणेतानिचत्वारि
करणानिजगुर्बुधाः।७४।शुक्लप्रतिपदांतेच।बवाख्यकरणंभवेत्।एकादश्यैवज्ञेयानि।वरस्त्रीरःवि
भागतः॥७५॥इतिकरणः॥ ॥दस्त्रोयमोनलोधाता।चंद्रोरुद्रोदितिर्गुरु॥भुजंगमाश्चपितृसवितृ
जलंविश्वेविधिविष्णु।वसवोवरुणस्तथाः७७॥अजैकपादहिर्बुध्न।पुषेतिकतिथिनाबुधे
॥अष्टाविंशतिसख्यानां।नक्षत्राणांमधीश्वरः॥७८॥इतिनक्षत्राधिपति॥ ॥शिरोमुखंकर्ण
नेत्रे।पृष्ठापृष्ठतिवेजना॥सुवर्णधनधान्यानांलाभस्तस्यनसंशयः॥७९॥स्कंधग्रीवाकंठह
स्तास्पर्शेपलाशोहितकृध्यः॥अष्टीनाभिसमायंघेह्यपानदिसिद्धतिः॥८०॥जंघालिंगकटिस्क

त्रि॰प्र॰बो॰ न्नें। कन्यालाभसुतोद्भवः॥ जानुगुल्फकटिस्पर्शे। महाक्लेशः प्रजायते।८१॥ कोष्ठमांसस्पर्शे मनचेन्म-
२३ तु फलादिस्पर्शेन शुभं॥ तृणांगारसंस्पर्शे। कार्यसिद्धिर्नजायते॥८२॥ काष्ठगंधर्वपत्रस्पर्शे। प्र
ह्पीडामनोभयं॥ मृगाराज्ञमांडां नि। स्पर्शे सिद्धिप्रजायते॥८३॥ शुभ्याजयेश्मशानेच। शुष्ककाष्टे ह्रनेत
रौ। गुल्मजस्माधर्मस्थाने। प्रश्ने क्लेशः प्रजायते॥८४॥ देवगेहनदिकुल॥ दिव्यस्थाने शुभंभवेत्॥ सु
खेदिव्युस्थितेसिद्धिः विद्दिस्तु नप्रजायते॥८५॥ इत्यंगस्फूरणविद्या॥ ॥तिस्रो मिनेचमेषेचापं
चशक्तिपलास्तथा। चतस्रो वृषेकुंभेप श्चपंचाशः प्रोक्ता श्च षोडश्च॥८६॥ मकरे मिथुनेपंचाघ
टीका विशिषापलाः॥ पंचकर्कैचचापेच। शशिवेदापलास्मृता॥८७ घटिका पंचसिंहेलो। द २३
यवेदाःपलास्मृताः। कन्यायां चतुलेपंचपलश्चंद्रस्तथाग्नय॥८८॥ इतिलग्नमानं॥ ॥सूर्येधे
नुश्चताम्रंच। गोधूमारक्तचंदनं॥ चंद्रेशंखंचचंदनं। वस्त्रंचसिततंदुला॥८९॥ अंगारके प्रदातव्यो।

रक्तवस्त्रगुडौदनं। बुधेकर्पूरकंमुक्ता। हरिद्रस्त्रं हरिन्मणि॥९०॥ पितवस्त्रंदयंजीवे। हरिद्राचण
कानिच॥ अश्वःशुक्रेसितोदेयः शुक्लधान्यानियानिच॥९१॥ शनौतैलंतिलादेयाः कृष्णगोलो-
हमुत्तमं॥ राहौचमहिषीछागौ। माषाश्चतिलसर्षपाः॥९२॥ अजामेषाचदातव्यौ। केतौचान्नंचमि
श्रितं। स्वर्नगोविप्राजाजि। सर्वेषांशांतिरुत्तमाः॥९३॥ इतिग्रहदानं॥ ॥मेषेगुरौ निर्हंचा सुदृ-
ष्टिश्चसुखीनरा। वृषेगुरौ स्वल्पवृष्टिः। प्रजापिडाचविग्रहः॥९४॥ अनावृष्टिःप्रजानाशो गौरवं मिथु
नेगुरौ॥ कर्केगुरौमहावृष्टिः। देशभंगोमहर्घता॥९५॥ सिंहेगुरौसुभिक्षं च। सुदृष्टिश्चप्रजायते॥
कन्यागुरौरोगपीडा। दुर्भिक्षंसस्यजन्मच॥९६॥ तुलेगुरौस्वल्पसस्यं। बहुजीरं प्रजा पैरुजं। अलो
लौजीवेचदुर्भिक्षं। राजचौरमहद्भयं॥९७॥ चापेगुरौशुभंसस्यसुखिजनः॥ दुर्भिक्षंमकरेजीवे
। राजयुद्धंपशुक्षयं॥९८॥ कुंभेगुरौसुभिक्षंच। धातुमूल्येमहर्घता॥ दुर्भिक्षं दक्षिणेदेशे। नान्यदेशे।

शिघ्रवो· रुष्युरौ॥९८॥इति बृहस्पतिचारः॥ ॥मार्यकार्त्तिकसंक्रांतौ।वृष्टौ वर्षतुमध्यमं।पौषेमाघेसु·
२४ स्वंनएणं॥सस्यपुनर्वसुंधरा॥९९॥चैत्रफाल्गुनवैशाखे।जेष्टानांसंक्रमेधनः॥यदिवर्षति·
सर्वत्रसुभिक्षंचप्रजायते॥४००॥आषाढेसंक्रमेहृष्टौ।व्याधिश्वश्रावणेसुखं।भाद्रेचबहवोरोगाः॥
शुभंसर्वत्रचाश्विनौ॥१॥इतिसंक्रांतिवृष्टिफलं॥ ॥चैत्रस्यशुक्लपंचम्यां।पूर्वेवापूर्वनोग
मे॥भाद्रेगुणात्रयेमूलं।समानंजायतेतदा॥२॥जेष्टस्यशुक्लपंचम्यांदक्षिणेयदिमारुतः॥
मेघगर्जस्तथाभाद्रेतैजेमौजंगुणत्रयं॥३॥अषाडशुक्लपंचम्यां।वृष्टिःपश्चीममारुतः॥न
दाचतुर्मौगुणंमोलं।धान्यनांकार्त्तिकेभवेत्॥४॥श्रावणेशुक्लपंचम्यां।वृष्टिर्वातिदिनद्वयं।दक्षिण एम·
:पश्चीमोत्तेयो।दुर्भिक्षंनान्यसंशयः॥५॥इतिचैत्रजेष्टअषाडश्रावणशुदी५फलं॥ ॥अषाडपूर्णि २४
मायांचदनिलोवातिनैर्ऋते॥अनावृष्टिधान्यनाशो।जलकूपेनदृश्यते॥६॥आषाडपूर्णिमायांतु॥

वायव्येयदिमारुतः॥मसकामूषकाःकीटा।जायतेशलभास्तथा॥७॥आषाडपूर्णिमायांस्या॥
दुत्तरेयदिमारुतः॥धनधान्यंग्रहेग्रहे॥८॥आषाडपूर्णिमायांचे।दीशानेवातिमारुतः॥सुखीनोहि
वदालोका।गीतवाद्यमहोत्सवः॥९॥वाह्निकोणेवह्निभितिः।पश्चीमेचजलाद्भयं।अनावृष्टिदिवा·
यूस्याभ्रुभिक्षंजायतेतदा॥१०॥सर्वमासेपूर्णिमायां।भूमिकंपोयदाभवेत्॥उल्कातारावज्रपातः
परिधिःशनिसूर्ययो॥११॥धूमकेतुश्चाक्रचापो।ग्रहणंबहुधातथा॥तदासकलवस्तुनां॥जायतेच
महर्घता॥१२॥इतिपूर्णिमाफलं॥ ॥आषाडशुक्लपक्षस्य।द्वितियायांनवर्षति॥यदामेघस्तदा
वृष्टिःश्रावणेजायतेध्रुवं॥१३॥तृतियायांपूर्ववायातिवारिदः॥नचमेघस्तदाभाद्रे।वर्षतिविपुलं
जलं॥१४॥चतुर्थांदक्षिणेवायूः।मेघपूर्वंचगछति॥अश्विनेचतस्मिमासे।वृष्टिर्भवतिनिश्चित
॥१५॥पंचम्यांमुत्तरेवायूः।नैरपतेचयदाबुध॥तदाचकार्त्तिकेमासे।वृष्टिर्भवतिनिश्चितं॥

शि॰प्र॰बो॰ चतुष्टये च दिवसे। यदा वर्षति वारिदः॥ अतिवृष्टिश्च दुर्भिक्षं। जायते नात्र संशयः॥ १७॥ दिनद्वयं
२५ यदा वाति। वातो दक्षिणपश्चिमे॥ तदा नश्यंति धान्यानि। दुर्भिक्षं च प्रजायते॥ सर्वं कृतयुगो
पमं॥ १८॥ द्वितीयातृतीयायां च पंचम्यां। वायुः पूर्वोत्तरे यदि। तदा धान्यानि जायंते सर्वं कृतयुगोपमं
॥ १९॥ इति आषाढशुक्लद्वितीयादिनचतुष्टयफलं॥ ॥ पौषे मूलेन रप्यां तं। चंद्रवारेण गर्ज
ति॥ आर्द्रादितो विशाखांतं। सूर्यवारेण वर्षति। २०। यदि तिष्ठति भौमस्य। क्षेत्रे कोपि ग्रहस्तदा
षण्मासं तु षधान्यानां। जायते च महर्घताः॥ २१॥ शुक्रक्षेत्रे अजे मासद्वयं तु नूनं महर्घता॥ च
द्रे च दिनना थे च सर्वज्ञो को शुभ सदा॥ २२॥ भौमो राहौ सर्वधान्यं॥ महर्घं राजविग्रहः॥ बुधक्षे राम॰
त्रे रवी चंद्रे। विरोधः सर्वभूभुजां॥ २३॥ उत्पत्तिस्तु षधान्यानां। पंचमासं प्रजायते॥ शुक्रक्षे २५
त्रे बुधे चंद्रे भं च क्षेत्रे च गास्तो। २४॥ पाषडानां अवेद्वृद्धिः धान्यानां च महर्घता॥ रविक्षेत्रे

गोपुत्रे॥ पशुनां च महर्घता॥ २५॥ बुधक्षेत्रे शनिचंद्रे। सप्तधान्यमहर्घता॥ शुक्रक्षेत्रे गुरौ भौमे
कर्पासादिमहर्घता॥ २६॥ भौमक्षेत्रे शनिराहौ। ताम्रादिच महर्घता॥ शनिक्षेत्रे भौमो राहौ। सुभि
क्षं चंद्रभास्करे। २७॥ पशुनाशो धान्यवृद्धिः गुडादिनां महर्घता॥ गुरौ क्षेत्रे भौमो राहौ। पशुनां सृणाद
यो। २८॥ भौमे राजविरोधस्या। बुधे वृष्टिश्चय सि॥ भौमक्षेत्रे यदा संति राहु भौमार्कभार्गवौ॥ २९॥ ष
षण्मासं गुड कर्पासं। मघृतक्षार महर्घता॥ मंदक्षेत्रे यदा संति। मंदरा भूषुधस्तया॥ ३०। चतुष्पदानां
नाशाय। द्विपदानां च जायते॥ भौमक्षेत्रे यदा संति। शुक्रभौमनिशाकरा॥ तदा तु का पशुनां च। सरस
व महर्घता॥ भौमक्षेत्रे भार्गवे च॥ धान्यानां च महर्घता॥ ३२॥ शनिक्षेत्रे चंद्रसूर्यौ वस्त्राणां च महर्घ
ता॥ शुक्रे भौमे गुरौ क्षेत्रे प्रजापिडा प्रजायते॥ ३३॥ ग्रहराशि समं योगो। फलमेतत्प्रकिर्तिता॥
३४॥ इति ग्रहराशियोगफलं॥ ॥ चंद्रोदये कुजक्षेत्रे। तषधान्यस्य वृद्धयः॥ चंद्रोदये अजक्षेत्रे।

शि॰प्र॰बो॰ क्षुधा धान्यस्य वृद्धयः ॥ चंद्रोदये स्वजक्षेत्रे स्वल्प वृद्धिकाया एके ॥ ३५ ॥ प्रजापीडा बुधक्षेत्रे सोमपु
२६ त्रोदये भवेत् ॥ रविक्षेत्रे तुलावृद्धिः ॥ शनिसोमसुतोदयः ॥ ३६ ॥ चंद्रक्षेत्रे शुक्रगुरु बुधानामुदयो यदि
॥ ष्पणा सस्याघ दुर्भिक्षं ॥ मतिवृष्टिश्च जायते ॥ ३७ ॥ उदिते च बुधक्षेत्रे ॥ यदा राहु शनिश्चरौः ॥ पशुक्षय
॥ प्रजापीडा ॥ धान्यानां च महर्घता ॥ ३८ ॥ शुक्रक्षेत्रे सोमसूर्ये सूर्यपुत्रोदयो पशूनां समीनं पीडा
जायते च महर्घता ॥ ३९ ॥ यदोदय शनिक्षेत्रे भौमभास्करयोर्भवेत् ॥ घृतानां च तथा वृद्धिः गुडा
नां रक्तवाससां ॥ ४० ॥ यदा समुदयं याति ॥ राशिक्षेत्रे शनिश्चरः ॥ तदा यांच तत्रण कार्पास ॥ लोहानां च
महर्घता ॥ ४१ ॥ इति ग्रहोदय राशिफलं ॥ ॥ गुरुर्यदा विशाखायां ॥ तदा धान्ये महर्घता ॥ मंगलेव राम
र्षकाले च शनौ सर्वत्र मंगलं ॥ ४२ ॥ स्वातिवाक्ष्ये यदार्द्रायां ॥ शनिरर्थे स्तदा नर्थ ॥ बुधे नार्धं च दुर्भिक्षं ॥ २६
सुभिक्षं चानुराधायां च स्थिते गुरौ ॥ ४३ ॥ उत्तरानंदने ॥ ४४ ॥ सुभिक्षं चानुराधायां यदा ग्रहस्थिता ॥ कल्या

णं च सुभिक्षं च ॥ श्लेषायां च स्थिते गुरौ ॥ ४६ ॥ कार्या सर्व द्रवो मंदे ॥ भौमे कंटकः पितुर्नं बुधे तैलाश्च
माषाश्च महर्घ विर्षकात ॥ ४७ ॥ सूर्ये च सर्वधान्यानि महर्घाणि भवंति च ॥ शुक्रे च महद्वितर्षा सस्या
नि सकलि[illegible]च ॥ ४८ ॥ मूले गुरौ कुलुत्थानां मुद्गानां बहुधा भवः ॥ भौमे मूलस्य चापस्या बुधे च सर्वसंपद
॥ ४९ ॥ पूर्वाषाढागते भौमे पीडा च पशु पक्षिणां ॥ कोतो महर्घो न्ये पूर्वाषाढगते भवेत् ॥ ५० ॥ उत्त
राषाढके जीवे गुडानां च महर्घता ॥ ५१ ॥ अभिजिन्नाम नक्षत्रे यदा तिष्ठा यासुतो भवेत् ॥ सर्वसस्या
नि जायंते शुभस्वं च श्रजेनया ॥ ५२ ॥ श्रवणे च यदा जीवो स्तदा स्फः सर्वसंपदः ॥ बुधे चासौ राजपुत्रेण
शनौ स्त्री स्त्रीरका ॥ ५३ ॥ कृत्तिकायां च रोहिण्यां यदा जीवो हि तिष्ठति ॥ मध्यमानि च सस्यानि तत
था वृष्टिश्च मध्यमा ॥ ५४ ॥ मृगशीर्षे तथार्द्रायां यदा वाचस्पतिः स्थितिः ॥ दुर्भिक्षं स्यात्तथा वृष्टिः प्रजानां
च तदा शिवं ॥ ५५ ॥ फाल्गुनीद्वय हस्तेषु मघायां च यदा गुरौ सुभिक्षं च वृष्टिश्च प्रजानां स्याद रोगिता

शिघ्रबो॰ ॥५६॥ चित्रास्वात्योर्यदा जीवः तदा चीत्रापयोधराः ॥ विचित्रा पिजवत्सेव । सस्यानि च जवेक्षुवित्
२७ ।५७॥ वैशाखमैत्रयो जीवे । धान्यं वर्षे च मध्यमाः ॥ जेष्ठामूले मासयूग्मं वृष्टिमासद्वयेन च ॥५८॥ पूर्वा
षाडोत्तराषाडे स्थितो यदि बृहस्पतिः ॥ नदा रोगं प्रसुमहर्षं च ॥ सुवृष्टिश्च प्रजायते ॥५९॥ स्वनावृष्टिश्च
दुर्भिक्षं रेवत्यां संस्थिते गुरौ ॥ धनिष्टायां च शुक्रेपि । पिडाजति हस्तिनां ॥६०॥ इति स्वर्घका डेन वग्र
हान क्षत्रगत फलं ॥ ॥ चूचेचोला अश्वनी लजीलूलेलरणी । अइउएकर्त्तिका । उवावेवोरोहणी ।
६१॥ वेवोकाकिमृगशिर ॥ कुघडछार्द्रा ॥ केकोहहीपुनर्वसु ॥ हदेहोडा पुष्य । इ्यडडीडूडेअश्लेषा
ममीमूमेमघा । मोटाटे पूर्वाफाल्गुनी । टेटोपापीउत्तराफाल्गुनी । ६२॥ पुषणठहस्त । पेपोरारिचीत्रा राम॰
रूरेरोतास्वा । ततितुते विशाखा ॥६४॥ ननीनुनेनुराधा । नोजाय्पियू ज्येष्टा । येयोभभिमूल ॥ भाधा २७
फाढा पूर्वाषाढा ॥६५॥ भेभोजजि उत्तराषाड जूजेजोजा अभिजित । षषिवुषे श्रवण ॥ गगीगुगे

धनिष्टा ॥६६॥ गोसासेसो शतभिषा । सेसोदादि पूर्वाभद्रपद ॥ दचझय उत्तराभद्रपद ॥ देदो-
च चितु रेवति । ६७ इति स्ववकडाचक्रं ॥ ॥ नुनुर्धनुर्भ्रातृबंधू पूर्वके त्रात्रुक त्रुकजत्रकं । मरणं ध-
र्मकर्म च ॥ लाभव्यय द्वादश राशय ॥ ६८ ॥ सप्तविंशतिभानां च । नवभिर्नवभिः पदैः ॥ अश्वनि प्रमु
खानां च । मेषाद्यो राशयः स्मृताः ॥६९॥ तृतीये दशमे पंचानवमे पंचमे दशाः ॥ दशपंचाष्टमे दशाः ॥
दशपंचाष्टमे सूर्ये सप्तविंशतिमं तथा ।७०॥ विश्वास्तुग्रहदृष्टिनां । मेषुस्थाने पूरुपिताः ॥ नामेव्य-
ये धनेलग्ने । षष्टे च ग्रहदृष्टयः ॥७१॥ तृतिये दशमे मे दो । नवमे मंदो । नवमे पंचमे गुरौः विंशतिवि
शते विश्वा । चतुर्थे चाष्टमे भूजः ।७२॥ रविवारे एसंयूक्तायदा स्यात्पौषज्येष्टयो ॥ अमावास्या तदा
दृष्टा । रुडमुंडा च जायते ॥७३॥ चयनात्रीगुणामासा । एकमं चाष्टादन्विताः ॥ दलिता घटीकाज्ञेया ।
पला स्त्रिगुणावासरा ।७४। एकपक्षे यदा यांति । तिथयश्च त्रयोदशः ॥ त्रयस्तदा क्षयं यांति । वाजिनो

त्रि॰प्र॰बी॰ मनुजागमः ॥७५॥ सूर्ययूक्काचन हन्ता ग्रहयादिसत्रयं नयं। आदित्यश्च बुधशुक्रा शनि चंद्र कुजस्तथा
२८ ॥७६॥ जिवो राहूश्च केतुश्च ॥ होमे क्रूरा न शोभना:॥ आदित्ये वनवेष्ठोको ॥ बुधे संपत्तिरुत्तमं:॥७७॥ शुक्रस्याच
धनप्राप्ति। शनौ पिडा च जायते॥ चंद्रे चैव मनवेक्षान:॥ भौमे च वध बंधनं॥७८॥ गुरुणां धन धान्यं च रा।
हु केतुश्च मृत्युकरो॥७९॥ द्भिरा ६ श्रीमुखो ७ भावो ८ ॥ यूवा ९ ॥ धाता १० तथैश्वर:॥ ११ ॥८०॥ बहुधान्य १२ प्र
माथी च १३ ॥ विक्रमो १४ वृषभ १५ स्तथा:॥ चित्रभानु १६ सुभानु १७ श्च । तारण १८ पार्थिवो १९ व्ययः ॥
८१ ॥ ब्रह्मणो विंशतिः ख्याते ॥ ख्यातेः॥ सृष्टिरत्र प्रजायते सर्वजीत् २१ सर्वधारी च २२ ॥ विरोधी २३ विकृत २४ स्त
था:॥ ८२॥ खर २५ नंदनं २६ नामा च ॥ विजयश्च २७ जयश्चैव २८ ॥ मन्मथो २९ दुर्मुख ३० ॥ श्चान्यो हेमलंब राम॰
३१ ॥ विलंब ३२ का ॥८३॥ विकारि ३३ शार्वरी ३४ चान्य:॥ प्लवश्च ३५ ॥ शुभकृत ३६ स्तथा ॥ शोभनश्च ३७ २८
तथा क्रोधी ३८ विश्वाह्वोनो ३९ वसु ४० स्तथा॥ ८४॥ प्लवंग ४१ कीलक ४२ सौम्य ४३ ॥ तथा साधा

रणोपर:॥४४॥ विरोधकृत्समाख्यातं ४५ परिधावी ४६ प्रमाथ्यपि ॥८५॥ आनंदो ४८ राक्षस ४९ श्चाथानल
श्च ५० पिंगल ५१ स्तथा:॥ काल ५२ ॥ सिद्धार्थ ५३ रौद्रश्चा ५४ ॥ दुर्मति ५५ ॥ दुंदुभि ५६ स्तथा:॥ ८६ ॥ रुधिरप
रेरुधीरोद्गारी ५७ रक्ताक्ष ५८ क्रोधन ५९ स्तथा ॥ ८७॥ क्षय कृदन्त्य ६० ॥ श्चान्यो । रुद्रस्वामी च विंशति॥ ८८
वत्सराः षष्टिमाख्याता । नाम तुल्य फलप्रदा:॥ ८९ ॥ इति षष्टिसंवत्सर नामानि॥ ॥ मेष वृश्चिकयोर्भौ
मः शुक्रो वृष तुलाधिपो ॥ बुध कन्यामिथुनयो ॥ प्रोक्तः कर्कस्य चंद्रमा:॥ ९० ॥ स्याद्धनमिनयोर्जीव
॥ शनि मकर कुंभयो:॥ सिंहस्याधिपति सूर्य ॥ कथितं गणकोत्तमै:॥ ९१ ॥ कन्या राहू गृहं प्रोक्तं ॥ राहू
च्च मिथुनस्यच ॥ राहुनीचं धनुर्वर्ना ॥ द्विकंत्रा निर्देशस्य च:॥ ९२ इति राशिस्वामि:॥ ॥ कार्त्तिकादि द्विगु
णामासा ॥ गता तिथि विर्युता:॥ सप्तविंशति निर्भक्तं ॥ दिनवारैक संयुता:॥ ९३ ॥ सार्द्धष्टमासा: पू
र्वे स्मिन्नुत्तरे तेद्धसप्तेत्व ॥ पंचपक्षे स्तथैव च ॥ पूर्वसाष्टगतेजगु:॥ ९४ ॥ नवमासाश्च विज्ञेया ॥ पश्चिमे

उदितेच गुरुः दृष्ट्वा हंसूर्यमध्येतु। नतश्चास्तमितो वसेत्॥ ९४॥ एकग्रामे पुरेवापि। दुर्भिक्षे राजविग्रहे॥
विवाहे तिर्थयात्रायां। शुक्रदोषो न विद्यते॥ ९५॥ आर्द्राद्यादृक्षसिर्णां। विशाखा त्रिनपुंसका॥ सुवाच
तुर्दशा पूर्षाः इतिनक्षत्रसंज्ञका॥ ९६ स्त्रिपुंसयोर्महा वृष्टिः स्त्रीनपुंसकयोः क्वचित्। स्त्रिस्त्रियो
श्चिवृजस्छाया। योगे पूरुषा योर्नच॥ ९७ बुधशुक्रसमिपस्थो। करोत्येकार्णवां महिं। नयो रंतर्गते भानु
समूद्रमपि शोषयेत्॥ ९८॥ जजराशि स्थितः श्चंद्रा। पद्मांते संक्रमे तथा॥ उदयोस्तमने शुक्रो। बुधस्पृ
ष्टिकारक॥ ९९॥ शुक्रस्यास्तमेने वृष्टि। रुदये च बृहस्पति॥ चजत्यंगारके वृष्टि त्रिधा वृष्टि शनिश्च
रे॥ १००॥ चजत्यंगारके वृष्टि त्रिधा वृष्टि शनिश्चरे॥ वारिपूर्णा मही कृत्वा। पश्चा संचरते गुरुः॥ कर्कस्य
नेव सिंहे च मकरे च दिवाकरे॥ पूर्वं वा पश्चिमं वापि। दारें कुर्याच वेश्मनि॥ मेषे वृषे वृश्चिके च
। तुले वापि यहारवि॥ ग्रहद्वारं तथा न्यर्याच्च रवायदक्षिणे॥ धन मिथुन कन्या सु मिनेच यदि भानु

मानूनकन्यीवं तदागेहे। कृतेदुःखमवाप्यते॥ ४६ इतिग्रहद्वारं॥ ॥ यैदैकमासे ग्रहणं। जायते सूर्यचंद्र
योः॥ शास्त्रकोपैः क्षयं यांति। तदान्योन्यपरस्परं। पायस्तोदितो च ग्रस्तास्तौ। धान्य नृपाजनाशकौः सर्व
ग्रस्तौ चंद्रसूर्यौ। दुर्भिक्ष मरणं प्रदौः॥ ६ उपरागो यदा मेषो पिड्यंते च तदा जनाः कंबोजं कीरातां
श्च। पंचालाश्वकजिंगकाः॥ ७॥ वृषे च ग्रहणे गोपाः पशवः पथिकारं जनाः॥ महंतामनुजायेचापी
ड्यंते च सर्वताः॥ ८॥ रविचंद्रमसोग्रासे। मिथुने च वरांगनाः। पिड्यंते च वह्निकाशायमुनांतट वासिनः
९॥ कर्कटे ग्रहणे पीडा। मह्लादिनां च जायते। आभिरस वराणांच। तयामन्ननिवासिनां॥ १०॥ सिंहे च ग्र
हणे पिडा। सर्वेषां वनवासिनां॥ नृपाणां नृपतुल्यानां। जायते च महद्भयं॥ ११ कन्यायां ग्रहणे पीडा।
। निपुणां व शालिनां कविनां लेखकनानां व गायकानां च जायते॥ १२॥ तुलायामुपरागे च। दशपानविंक
का फुकाः॥ सुपरश्च परत्यांश्च। पीड्यंते साधव श्चये॥ १३॥ वृश्चिके ग्रहणे पिडा सर्पजातिश्च जायते। उदं

वरश्च मद्रस्या। चोलयोधेयकस्तथ॥१४॥ यदा परागश्चापे वा तदामत्याश्चवार्जनः॥ विदेहस्तद्वपांचालापि
ड्यंते निषजोविप्राः॥१५॥ मकरेग्रहणे पिड्या निचाम्नां मंत्रवादिनां। म्लेछविराणजटानां च। चिक्रकुष्टस्यसंह्व
यः॥१६॥ कुंभेपरागे पिड्यंते गिरिजाः पश्चिमाजनाः। तस्कराद्दरदीनीराः। देशा बर्बरकादयः॥१७॥ मिनेप
रागेपि ड्यंते जलद्रव्याणि सागराः॥ जलोपजिविनो लोकाः॥ येंच प्रज्ञाचरूंनरः॥१८॥ इति ग्रहणफलं
ग्रयकन्यांसुदृष्टिश्चविहारश्चजयंत्वर्यागनिर्वर्तोनृपमांतिदः॥ फुज्ञावायूचंडरयश्चः श्रौदृशितित्रिग्रहायको
२०॥ हि त्रिग्रहारयूढेचरायूढ्य। केतोपूष्ठेतथैव च॥ ग्रहणांते महावृष्टि। सर्वदोषविनाशनः॥२१॥ इति धूलेर्च
नादिफलं॥ ॥अश्विन्यामुदितः केतुर्हन्या दश्मकपालकां॥ भरण्यांचकिरातेंद्रं। कृत्तिकायां कलिंगकं

॥२२॥ रोहिण्यांसुरसेनेशं। मृगेचौसीनरा। पिधिपं। आर्द्रायांजलजाधिपः॥ भस्मकेशं पुनर्वसु॥२३॥ आश्लेषेच
मगधाधिपं। स्वर्मायां काशिपाधीपं। मघायां मगनाथं च। पूर्वायां पिड्या नायकं॥२४॥ उत्तरफिन्यां नपंचस्य।

दुत्तराफाल्गुनीगतः॥ दंडकाधिपतिर्हस्ते। चित्रायांकुरुभूमिपः॥२५॥ स्वात्यां काश्मीरकांबोजा। नृपतिनां विना
शकः॥ इक्ष्वाकुं कुतुचेशानां। विशाखायां विनाशकं॥२६॥ अनुराधमद्रकनाथो च। मूलस्थो हंति नैमिषं। पूर्वाषा
डिकोग्निराजा। उत्तराषाडिकेतथा॥२७॥ योद्धयसी विवोधेत्रं। श्रवणेकैकयेश्वरः॥ वसोपंचनदाधिपं। वारु
णेसिंहलेश्वरं॥२८॥ पूर्वाभद्रपदे चांगं। नैमिषं ऊत्तरयो नरेः। रेवत्यांउदितेकेतु। किरानाधिपतेर्वधः॥२९॥ धूम्रा
कारसपूंछश्च। केतुर्विश्वस्यपिडकः॥३०॥ इतिकेतुदयफलं॥ ॥ मानुर्भौमार्कवारश्चे। कार्तिकेंदुद्ययोनवेत्
ध्यायूष्मानत्वातिसंयूक्तो॥ नृपनाश प्रमुद्यय॥३१॥ धनुर्मृगोचमेषाद्या। चत्वारः स्फ निराबला॥ नैविना
मिथुनंपचाज्ञेयापृष्ठेदयाबुधैः॥३२॥ शिर्षोदयाश्च चत्वारा। सिंहार्पश्चुलएवच॥ दिवाबला च मिनस्यात्र
लाराज्ञौ तथा दिने॥३३॥ नर्देषाद्भिश्चुणीकृत्य। प्रमेहिनं न कारयेत॥ मुनिनिश्च हरेज्ज्ञागं। शेषांकेचबलंवदे
त्॥३४॥ चंद्रबेदेचदुर्भिक्षं। सुभिक्षंयुगवाणयो। रामेरसेधामश्च। शुन्ये शुन्ये प्रकिर्तितः॥३५॥ ॥ इतिश्रीका

शिघ्रबो॰ शिनाथविरचितंशिघ्रबोधसंपूर्णः।समाप्तः॥ ॥श्रीरस्तु॥ ॥ ॥७॥ ॥
३२